श्रीसत्यनारायणपूजाविधिः

राष्ट्रिय संस्कृत संस्थानस्य
धनसहाय्येन प्रकाशितः

सम्पादकः
डा।। हित्लळ्ळि सूर्यनारायण नागेन्द्र भट्टः

प्रकाशकाः
श्री राजराजेश्वरी विद्यासंस्था (पं.)
श्री सोन्दा स्वर्णवल्ली महासंस्थानम्
पोः मठदेवल- ५८१ ३३६ शिरसि (उ.क.)
कर्णाटक



श्रीसत्यनारायणपूजाविधिः

राष्ट्रिय संस्कृत संस्थानस्य
धनसहाय्येन प्रकाशितः

सम्पादकः
डा।। हित्लळ्ळि सूर्यनारायण नागेन्द्र भट्टः

प्रकाशकाः
श्री राजराजेश्वरी विद्यासंस्था (पं.)
श्री सोन्दा स्वर्णवल्ली महासंस्थानम्
पोः मठदेवल- ५८१ ३३६ शिरसि (उ.क.)
कर्णाटक

श्रीः

श्रीसत्यनारायणपूजाविधिः

श्री गणेशाय नमः। श्री सरस्वत्यै नमः।
श्री गुरुभ्यो नमः।

व्रती सङ्क्रान्तौ पौर्णमास्यां अमावास्यायां एकादश्यां द्वादश्यां वा सूर्य- भौम-भृगुवासरेषु वा व्यतीपातादियोगेषु वा यस्मिन् कस्मिन्वा दिने प्रातर्मनसा व्रतं सङ्कल्प्य उपोषितः सायाह्ने नद्यादौ स्नात्वा नित्यक्रियां निर्वर्त्य सङ्गृहीत-सकलसम्भारः पूजास्थानमागत्यासने उपविश्याचम्य

(ॐ ऋग्वेदाय स्वाहा। ॐ यजुर्वेदाय स्वाहा। ॐ सामवेदाय स्वाहा।

ॐ अथर्ववेदाय नमः ।

ॐ इतिहासपुराणेभ्यो नमः ।

ॐ अग्नये नमः ।

ॐ नक्षत्रेभ्यो नमः ।

ॐ विष्णवे नमः ।

ॐ सूर्याय नमः ।

ॐ चन्द्रमसे नमः ।

ॐ प्राणाय नमः ।

ॐ अपानाय नमः ।

ॐ दिग्भ्यो नमः ।

ॐ इन्द्राय नमः ।

ॐ पृथिव्यै नमः ।

ॐ अन्तरिक्षाय नमः ।

ॐ दिवे नमः ।

ॐ ब्रह्मणे नमः ।

ॐ रुद्राय नमः ।

ॐ शिवाय नमः ।

ॐ सप्तर्षिभ्यो नमः ।)

पवित्रपाणिः (तत्र मन्त्रः -

ॐ पवित्रमर्को रजसो विमानः । पुनाति देवानां भुवनानि विश्वा ।

सुवर्ज्योतिर्यशो महत् । अशीमहि गाधमुत प्रतिष्ठाम् ।।

पवित्रं धृत्वा) प्राणानायम्य (प्रणवस्य परब्रह्म ऋषिः । दैवी गायत्री छन्दः । परब्रह्म परमात्मा देवता । प्राणायामे विनियोगः ।

ॐ भूः । ॐ भुवः । ॐ सुवः । ॐ महः । ॐ जनः । ॐ तपः । ॐ सत्यम् ।

ॐ भूर्भुवः सुवः । तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ।।

ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम् ।।

त्रिवारं वदेत् । सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ।। इत्युक्तेः। एवं प्राणायामत्रयं कृत्वा, सुमुखश्चेत्यादिदेशकालौ सङ्कीर्त्य)

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।

लम्बोदरश्च विकटो विघ्नराजो गणाधिपः ।।

धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।

द्वादशैतानि नामानि यः पठेच्छृणुयादपि ।।

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।

सङ्ग्रामे सर्वकार्येषु विघ्नस्तस्य न जायते ।।
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ।।
सर्वेषु कालेषु समस्तदेशेष्वशेषकार्येषु तथेश्वरेश्वरः ।
सर्वस्वरूपी भगवाननादिर्ममास्तु माङ्गल्यविवृद्धये हरिः ।।
ममास्तु माङ्गल्यविवृद्धये हरः ।
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ।।
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ।।
सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः ।
देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ।।
स्मृते सकलकल्याणभाजनं यत्र जायते ।
पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ।।
सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ।
येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ।।
मङ्गलं भगवान् विष्णुर्मङ्गलं मधुसूदनः ।
मङ्गलं पुण्डरीकाक्षो मङ्गलं गरुडध्वजः ।।
सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ।।
सर्वमङ्गलदातारौ पार्वतीपरमेश्वरौ ।
गणेशस्कन्दसंयुक्तौ वन्दे वाञ्छितसिद्धये ।।

यः शिवो नामरूपाभ्यां या देवी सर्वमङ्गला ।
तयोः संस्मरणात् पुंसां सर्वतो जयमङ्गलम् ।।
तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ।।

लक्ष्मीनारायणाभ्यां नमः ।

उमामहेश्वराभ्यां नमः ।

वाणीहिरण्यगर्भाभ्यां नमः ।

सीतारामाभ्यां नमः ।

शचीपुरन्दराभ्यां नमः ।

अरुन्धतीवसिष्ठाभ्यां नमः ।

दुर्गायै नमः ।

गणपतये नमः ।

क्षेत्रपालाय नमः ।

वास्तुपुरुषाय नमः ।

मातृभ्यो नमः ।

पितृभ्यो नमः ।

गुरुभ्यो नमः ।

आचार्येभ्यो नमः ।

इष्टदेवताभ्यो नमः ।

कुलदेवताभ्यो नमः ।

ग्रामाधिदेवताभ्यो नमः ।

सर्वेभ्यो देवेभ्यो नमः ।

सर्वाभ्यो देवताभ्यो नमः ।

सर्वेभ्यो ब्राह्मणेभ्यो नमः ।

सुमुहूर्तमस्तु ।

विष्णोः विष्णोः विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणः द्वितीयपरार्धे आदौ श्रीहरेः श्वेतवराहकल्पे वैवस्वतमन्वन्तरे कलियुगे प्रथमपादे जम्बूद्वीपे भरतखण्डे भारतवर्षे महामेरोः दक्षिणे पार्श्वे श्रीमद्गोदावर्याः शुभदक्षिणे तीरे गोकर्णमण्डले गोराष्ट्रदेशे भास्करक्षेत्रे सह्यपर्वते शालिवाहनशकाब्दे बौद्धावतारे अस्मिन् वर्तमानकालनामव्यावहारिके ... संवत्सरस्य ... अयने ... ऋतौ ... मासे ... पक्षे ... तिथौ ... वासरयुक्तायां शुभतिथिवारनक्षत्रयोगकरणयुक्तायां एवंगुणविशेषणविशिष्टायां पुण्यायां पुण्यकाले महापुण्यशुभतिथौ मम सकुटुम्बस्य सपरिवारस्य सकलदुरितोपशमनार्थं सर्वापच्छान्त्यर्थं सर्वाभीष्टसिद्ध्यर्थं समस्तमङ्गलावाप्त्यर्थं श्रीसत्यनारायणप्रीत्यर्थं (मण्डलदेवतावाहनपूर्वकं) कलशस्थापनं पूजनं कथाश्रवणं च करिष्ये ।

तदादौ त्रिवाक्यैः पञ्चवाक्यैर्वा पुण्याहवाचनं आसनादिविधिं शरीरशुद्ध्यर्थं मन्त्रन्यासं कलशार्चनादिकं च करिष्ये ॥

तन्निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं करिष्ये ॥

ॐ गणानां त्वा गणपतिगुँ हवामहे कविं कवीनामुपमश्रवस्तमम् ।

ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥

ॐ भूः गणपतिमावाहयामि ।

ॐ भुवः गणपतिमावाहयामि ।

ॐ सुवः गणपतिमावाहयामि ।

ॐ भूर्भुवस्सुवः गणपतिमावाहयामि ।

ॐ गं गणपतये नमः ध्यायामि । ध्यानं समर्पयामि ।

ॐ गं गणपतये नमः पाद्यं समर्पयामि ।

ॐ गं गणपतये नमः अर्घ्यं समर्पयामि ।

ॐ गं गणपतये नमः आचमनीयं समर्पयामि ।

ॐ गं गणपतये नमः स्नानं समर्पयामि ।

ॐ गं गणपतये नमः आचमनीयं समर्पयामि ।

ॐ गं गणपतये नमः वस्त्रं समर्पयामि ।

ॐ गं गणपतये नमः उपवीतं समर्पयामि ।

ॐ गं गणपतये नमः आभरणं समर्पयामि ।

ॐ गं गणपतये नमः गन्धं समर्पयामि ।

ॐ गं गणपतये नमः अक्षतान् समर्पयामि ।

ॐ गं गणपतये नमः पुष्पाणि समर्पयामि ।

ॐ गं गणपतये नमः धूपमाघ्रापयामि ।

ॐ गं गणपतये नमः दीपं दर्शयामि ।

ॐ गं गणपतये नमः नैवेद्यं समर्पयामि ।

ॐ गं गणपतये नमः ताम्बूलं समर्पयामि ।

ॐ गं गणपतये नमः सुवर्णपुष्पदक्षिणां समर्पयामि ।

ॐ गं गणपतये नमः नीराजनं समर्पयामि ।

ॐ गं गणपतये नमः मन्त्रपुष्पं समर्पयामि ।

ॐ गं गणपतये नमः प्रदक्षिणं समर्पयामि ।

ॐ गं गणपतये नमः नमस्कारान् समर्पयामि ।

ॐ गं गणपतये नमः प्रार्थनं करिष्ये ॥

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।

अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ।।
कुण्डलीकृतनागेन्द्र खण्डेन्दुकृतशेखर ।
पिण्डीकृतमहाविघ्न ढुण्ढिराज नमोऽस्तु ते ।।
ॐ गं गणपतये नमः प्रार्थनं समर्पयामि ।
अनेन पूजाराधनेन श्रीमहागणपतिः प्रीयताम् ।।

क्षेत्रस्याधिपतिं प्रार्थयेत् ।।
ॐ क्षेत्रस्य पतिना वयगुँ हितेनेव जयामसि ।
गामश्वं पोषयित्नुवा स नो मृडातीदृशे ।।
क्षेत्रपालाय नमः फलताम्बूलं समर्पयामि ।
वास्तोष्पतिं पूजयेत् ।।
ॐ वास्तोष्पते प्रतिजानीह्यस्मान् स्वावेशो अनमीवो भवा नः ।
यत्त्वेमहे प्रतितन्नो जुषस्व शं न एधि द्विपदे शं चतुष्पदे ।।
वास्तोष्पते नमस्तेऽस्तु भूशय्यानिरत प्रभो ।
मद्गृगे धनधान्यादिसमृद्धिं कुरु सर्वदा ।।
वास्तोष्पतये नमः प्रार्थनां समर्पयामि ।

ततो ब्राह्मणान् -
ॐ आपः । शिवा आपः सन्तु ।
ॐ गन्धाः । सुगन्धाः पान्तु ।।
ॐ अक्षताः । अस्त्वक्षतमरिष्टं च ।
ॐ पुष्पाणि पान्तु । सौश्रेयमस्तु ।
ॐ ताम्बूलानि पान्तु । ऐश्वर्यमस्तु ।
ॐ दक्षिणाः । स्वस्ति दक्षिणाः पान्तु । बहुदेयं चास्तु ।

गन्धादिभिः संपूज्य,

मह्यंसकुटुम्बिनेमहाजनान्नमस्कुर्वाणायाशीर्वचनमुपेक्षमाणायाद्य करिष्यमाण श्री सत्यनारायणव्रतकर्मणः पुण्याहं भवन्तो ब्रुवन्तु । ॐ पुण्याहम् ।। १ ।।

मह्यंसकुटुम्बिनेमहाजनान्नमस्कुर्वाणायाशीर्वचनमुपेक्षमाणायाद्य करिष्यमाण श्री सत्यनारायणव्रतकर्मणे स्वस्ति भवन्तो ब्रुवन्तु । ॐ आयुष्मते स्वस्ति ।। २ ।।

मह्यंसकुटुम्बिनेमहाजनान्नमस्कुर्वाणायाशीर्वचनमुपेक्षमाणायाद्य करिष्यमाण श्री सत्यनारायणव्रतकर्मणः ऋद्धिं भवन्तो ब्रुवन्तु । ॐ ऋध्यताम् ।। ३ ।।

मह्यंसकुटुम्बिनेमहाजनान्नमस्कुर्वाणायाशीर्वचनमुपेक्षमाणायाद्य करिष्यमाण श्री सत्यनारायणव्रतकर्मणः श्रीरस्त्विति भवन्तो ब्रुवन्तु। अस्तु श्रीः ।। ४ ।।

मह्यंसकुटुम्बिनेमहाजनान्नमस्कुर्वाणायाशीर्वचनमुपेक्षमाणायाद्य करिष्यमाण श्री सत्यनारायणव्रतकर्मणः कल्याणं भवन्तो ब्रुवन्तु । ॐ अस्तु कल्याणम् ।। ५ ।।

संक्षेपेणासनादिविधिः

ॐ लं पृथिव्यै नमः । भूमिं गन्धादिभिरभ्यर्च्य तत्र कुशाद्यन्यतमं आसनमास्तीर्य

पृथ्वीत्यस्य मेरुपृष्ठ ऋषिः । सुतलं छन्दः । आदिकूर्मो देवता । आसने विनियोगः ।।

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ।।

ॐ आधारशक्तिकमलासनाय नमः ।
आसनमभिमन्त्र्य तत्र प्राङ्मुख उदङ्मुखो वोपविशेत् ।।

ॐ ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षिणि ।
तिष्ठ देवि शिखाबन्धे चामुण्डे ह्यपराजिते ।। शिखां बध्वा,

अपसर्पन्त्वितस्य वामदेव ऋषिः । अनुष्टुप् छन्दः । भूतानि देवताः । भूतोच्चाटने विनियोगः ।।

ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।। भूतान्युत्सार्य,

ॐ फट् । घण्टां संपूज्य,
ॐ आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
आदौ घण्टारवं कुर्वे देवताह्वानलक्षणम् ।।
ॐ जय ध्वनिमन्त्रमातः स्वाहा । घण्टां वादयित्वा ।।

ॐ नमः सुदर्शनाय अस्त्राय फट् । ताळत्रयं कृत्वा छोटिकाभिर्दिग्बन्धं कुर्यात् ।।

ॐ तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ।। भैरवं प्रार्थयेत् ।।

मन्त्रन्यासः

ॐ अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे ।
पृथिव्याः सप्त धामभिः ।। अङ्गुष्ठाभ्यां नमः ।।

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पागुँसुरे ।। तर्जनीभ्यां नमः ।।
ॐ त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः ।
अतो धर्माणि धारयन् ।। मध्यमाभ्यां नमः ।।
ॐ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ।
इन्द्रस्य युज्यः सखा ।। अनामिकाभ्यां नमः ।।
ॐ तद्विष्णोः परमं पदगुँ सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ।। कनिष्ठिकाभ्यां नमः ।।
तद्विप्रासो विपन्यवो जागृवागुँसः समिन्धते ।
विष्णोर्यत् परमं पदम् ।। करतलकरपृष्ठाभ्यां नमः ।।

एवं हृदयादिन्यासः ।।
(ॐ अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे ।
पृथिव्याः सप्त धामभिः ।। हृदयाय नमः ।।
ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पागुँसुरे ।। शिरसे स्वाहा ।।
ॐ त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः ।
अतो धर्माणि धारयन् ।। शिखायै वषट् ।।
ॐ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ।
इन्द्रस्य युज्यः सखा ।। कवचाय हुम् ।।
ॐ तद्विष्णोः परमं पदगुँ सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ।। नेत्रत्रयाय वौषट् ।।
तद्विप्रासो विपन्यवो जागृवागुँसः समिन्धते ।
विष्णोर्यत् परमं पदम् ।। अस्त्राय फट् ।।)

अष्टाक्षरन्यासः

ॐ ॐ नमः । मूर्ध्नि ।।

ॐ नं नमः । नेत्रयोः ।।

ॐ मों नमः । मुखे ।।

ॐ नां नमः । हृदये ।।

ॐ रां नमः । नाभौ ।।

ॐ यं नमः । गुह्ये ।।

ॐ णां नमः । जान्वोः ।।

ॐ यं नमः । पादयोः ।।

कलशार्चनम्

शुद्घजलपूर्णे कलशे -

ॐ इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमगूँ सचता परुष्णिया।
असिक्निया मरुद्वृधे वितस्तयार्जीकीये । श्रृणुह्या सुषोमया ।।

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ।।
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।।
अङ्गैश्च सहिताः सर्वे कलशाम्बु समाश्रिताः ।
अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ।।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः ।
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।।
गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ।।

कलशदेवताभ्यो नमः गन्धाद्युपचारपूजां समर्पयामि ।।

शङ्खार्चनम्

देवस्य पुरतः त्रिकोणाकारमण्डले प्रक्षाळितं सपीठं शङ्खं प्रतिष्ठाप्य, प्रणवेन जलं पूरयित्वा, गन्धादिभिरभ्यर्च्य

ॐ पाञ्चजन्याय विद्महे पद्मगर्भाय धीमहि ।

तन्नः शङ्खः प्रचोदयात् ।।

अभिमन्त्र्य, पुष्पपाणिः ॐ भूर्भुवस्सुवः । शङ्खोदकेन देवं यागभूमिं पूजोपकरणान्यात्मानं च प्रोक्ष्य शङ्खं देवस्य दक्षिणे भागे स्थापयेत् ।।

मण्डपार्चनम्

उद्यत्पत्रफलातिनम्रविलसद्रम्भाभिरालिङ्गित-

स्तम्भं चारुदलै रसालविटपैः सर्वत्र संवेष्टितम् ।

राजच्चामरसम्प्रबद्घमुकुरोदञ्चद्वितानान्वितं

युक्तं पुष्पफलैरलङ्कृतमथो ध्यायेन्महामण्डपम् ।।

ॐ मण्डपाश्रितसकलदेवताभ्यो नमः । जलगन्धाद्युपचारपूजां समर्पयामि ।

द्वारपाल पूजा

ॐ द्वारदेवताभ्यो नमः । द्वारपालपूजां करिष्ये -

ॐ नन्दाय नमः । ॐ सुनन्दाय नमः । पूर्वद्वारलक्ष्मै नमः ।
ॐ चण्डाय नमः । ॐ प्रचण्डाय नमः । दक्षिणद्वारलक्ष्मै नमः ।
ॐ बलाय नमः । ॐ प्रबलाय नमः । पश्चिमद्वारलक्ष्मै नमः ।
ॐ भद्राय नमः । ॐ सुभद्राय नमः । उत्तरद्वारलक्ष्मै नमः ।

पीठपूजा

(मण्डपमध्ये पीठं संस्थाप्य पूजयेत् ।) पीठपूजां करिष्ये -

ॐ आधारशक्त्यै नमः ।

ॐ मूलप्रकृत्यै नमः ।

ॐ आदिकूर्माय नमः ।

ॐ अनन्ताय नमः।

ॐ वराहाय नमः।

ॐ पृथिव्यै नमः।

ॐ क्षीरसमुद्राय नमः।

ॐ श्वेतद्वीपाय नमः।

ॐ मणिमण्डपाय नमः।

ॐ कल्पवृक्षाय नमः।

ॐ हेमवेदिकायै नमः।

ॐ रत्नसिंहासनाय नमः।

ॐ धर्माय नमः।

ॐ ज्ञानाय नमः।

ॐ वैराग्याय नमः।

ॐ ऐश्वर्याय नमः।

ॐ अधर्माय नमः।

ॐ अज्ञानाय नमः।

ॐ अवैराग्याय नमः।

ॐ अनैश्वर्याय नमः।

ॐ सर्वतत्त्वपद्माय नमः।

ॐ आनन्दकन्दाय नमः।

ॐ संविन्नाळाय नमः।

ॐ विकारमयकेसरेभ्यो नमः।

ॐ प्रकृतिमयपत्रेभ्यो नमः।

ॐ पञ्चाशद्वर्णकर्णिकायै नमः।

ॐ अं अर्कमण्डलाय द्वादशकलात्मने नमः।

ॐ उं सोममण्डलाय षोडशकलात्मने नमः।

ॐ मं वह्निमण्डलाय दशकलात्मने नमः।

ॐ सं सत्त्वाय नमः।

ॐ रं रजसे नमः।

ॐ तं तमसे नमः।

ॐ आं आत्मने नमः।

ॐ अं अन्तरात्मने नमः।

ॐ पं परमात्मने नमः।

ॐ ह्रीं ज्ञानात्मने नमः ।।

पीठपूजां समर्पयामि ।।

नवशक्तिपूजा

नवशक्तिपूजां करिष्ये -

ॐ विमलायै नमः ।

ॐ उत्कर्षिण्यै नमः ।

ॐ ज्ञानायै नमः।

ॐ क्रियायै नमः।

ॐ योगायै नमः।

ॐ ब्राह्म्यै नमः।

ॐ सत्यायै नमः।
ॐ ईशानायै नमः।
ॐ अनुग्रहायै नमः ।
नवशक्तिपूजां समर्पयामि ।।

ॐ नमो भगवते विष्णवे सर्वभूतात्मने सकलगुणशक्तियुक्ताय वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नमः । सुवर्णपीठं कल्पयामि । पीठं प्रकल्प्य पीठोपरि षट्कोणवृत्ताष्टदलवृत्तात्मकं सत्यनारायणयन्त्रं विलिख्य

ॐ उत्तप्तोज्वलकाञ्चनेन रचितं तुङ्गाङ्गरङ्गस्थलं
शुद्घस्फाटिकभित्तिकाविलसितैः स्तम्भैश्च हैमैः शुभैः ।
द्वारैश्चामररत्नराजखचितैः शोभावहैर्मण्डितैः
छत्राकैरपि चित्रशङ्खधवलैः प्रोद्भासितैः स्वस्तिकैः ।।
मुक्तादामविलम्बिमण्डपयुतैर्वज्रैश्च सोपानकैः
नानारत्नविनिर्मितैश्च कलशैरत्यन्तशोभावहम् ।
माणिक्योज्वलदीपदिप्तिकपिशंलक्ष्मीविलासास्पदम्
ध्यायेन्मण्टपमर्चनेषु सकलेष्वेवंविधं साधकः ।।
स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम् ।
तावत्त्वं प्रीतिभावेन यन्त्रेऽस्मिन् सन्निधिं कुरु ।।
मण्डल(यन्त्र)दर्शनं कुर्यात् ।

कलशस्थापनम्

ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् ।
पिपृतान्नो भरीमभिः ।। भूमिं स्पृष्ट्वा ।

ॐ ओषधयः संवदन्ते सोमेन सह राज्ञा ।
यस्मै करोति ब्राह्मणस्तगुँ राजन् पारयामसि ।।
धान्यराशिं कृत्वा ।

ॐ आजिघ्र कलशं मह्युरुधारा पयस्वत्या त्वाविशन्त्विन्दवः समुद्रमिव सिन्धवः सामा सहस्त्र आभज प्रजया पशुभिः सह पुनर्मा विशताद्रयिः ।।

तत्र कलशं संस्थाप्य ।

ॐ इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमगूँ सचता परुष्णिया। असिक्निया मरुद्वृधे वितस्तयार्जीकीये श्रृणुह्या सुषोमया ।।

कलशं शुद्घजलेनापूर्य ।

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीगूँ सर्वभूतानां तामिहोपह्वये श्रियम् ।। गन्धम् ।

ॐ काण्डात्काण्डात् प्ररोहन्ती परुषः परुषः परि ।
एवा नो दूर्वे प्रतनु सहस्त्रेण शतेन च ।। दूर्वाः ।

ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिः कृता ।
गोभाज इत्किलासथ यत् सनवथ पूरुषम् ।। पल्लवान् ।

ॐ स्योना पृथिवि भवा नृक्षरा निवेशनी ।
यच्छा नः शर्म सप्रथाः ।। अष्टमृदः ।

ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिः प्रसूतास्तानो मुञ्चन्त्वगुँहसः ।। फलम् ।

ॐ बृहस्पते जुषस्व नो हव्यानि विश्वदेव्या ।
रास्व रत्नानि दाशुषे ।। पञ्चरत्नानि ।

ॐ अग्ने रेतश्चन्द्रगुँ हिरण्यम् । अद्भ्यः सम्भूतममृतं प्रजासु ।
तत्सम्भरन्नुत्तरतो निधाय। अति प्रयच्छं दुरितिं तरेयम्।। हिरण्यम्।

ॐ युवा सुवासाः परिवीत आगात्। स उ श्रेयान् भवसि जायमानः।
तं धीरासः कवय उन्नयन्ति । स्वाधियो मनसा देवयन्तः।। वस्त्रम्।

ॐ पूर्णा दर्वि परापत सुपूर्णा पुनरापत ।
वस्नेव विक्रीणावहा इषमूर्जगूँ शतक्रतो।। तण्डुलपूर्णपात्रं निधाय ।

ॐ तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशगुँ समान आयुः प्रमोषीः ।।
ॐ भूः वरुणमावाह्य पूजयेत् ।।

स्त्रीशूद्राणां कलशस्थापने पौराणमन्त्राः

चतुर्भुजे शुक्लवर्णे दिव्याभरणभूषिते ।
चतुर्दिङ्नागपृष्ठस्थे भूमे त्वां संस्पृशाम्यहम् ।। भूमिं स्पृष्ट्वा ।।

सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत् ।

प्राणिनां जीवनोपायं स्थापयामीष्टसिद्घये ।। धान्यराशिं कृत्वा ।

देवासुरैर्मथ्यमानादुत्पन्नोऽसि महोदधेः ।
कुम्भ त्वयि सुराः सर्वे तीर्थानि जलदा नदाः ।।

तिष्ठन्ति कामफलदा रुद्रादित्यादयोऽपि च ।
अतोऽत्र धान्यराशौ त्वां पूजार्थं स्थापयाम्यहम्।। तत्र कलशं संस्थाप्य ।।

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि कुम्भेऽस्मिन् सन्निधिं कुरु।। शुद्घजलेनापूर्य।।

कस्तूरीकुङ्कुमोपेतं कर्पूरेण च संयुतम् ।
चन्दनं सर्वगन्धाढ्यं कुम्भेऽस्मिन् प्रक्षिपाम्यहम् ।। गन्धं प्रक्षिप्य ।।

त्वं दूर्वेऽमृतजन्मासि वन्दितासि सुरासुरैः ।
सौभाग्यं सन्ततिं देहि सर्वकार्यकरी भव ।। दूर्वाः ।।

अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधपल्लवान् ।
अस्मिन् कुम्भे प्रक्षिपामि सर्वकर्मसु शोभनान् ।। पञ्चपल्लवान् ।।

गजाश्वरथवल्मीकसङ्गमह्रदगोकुलात् ।
मृदमानीय कुम्भेऽस्मिन् प्रक्षिपामि च चत्वरात् ।। अष्टमृदः ।।

फलं मनोहरं स्वादु मुनिदेवप्रियं सदा ।
अस्मिन् कुम्भे प्रक्षिपामि सर्वदा मङ्गलप्रदम् ।। फलम् ।।

सुवर्णं रजतं मुक्ता राजावर्तं प्रवालकम् ।
इमानि पञ्चरत्नानि कलशे प्रक्षिपाम्यहम् ।। पञ्चरत्नानि ।।

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।। हिरण्यम् ।।

ईषद्धौतेन शुद्धेन सदशेनाहतेन च ।
संवेष्टयामि कलशं नूतनेन सुवाससा ।। वस्त्रम् ।।

पूर्णपात्रं ताम्रमयं शालितण्डुलपूरितम् ।
प्रधानदेवपूजार्थं न्यसामि कलशोपरि ।। तण्डुलपूर्णपात्रं निधाय ।।

पाशहस्तं च वरुणं यादसामम्भसां पतिम् ।
आवाहयामि कुम्भेऽस्मिन् देवं मकरवाहनम् ।।

वरुणाय नमः । वरुणमावाहयामि ।
इत्यादि वरुणं षोडशोपचारैः पूजयेत् ।।

तत्र यथाक्रमं देवता आवाहयेत् । षट्कोणेषु पूर्वादिक्रमेण -

ॐ गणेशाय नमः । गणेशमावाहयामि ।।

ॐ गौर्यै नमः । गौरीमावाहयामि ।।

ॐ वाण्यै नमः । वाणीमावाहयामि ।।

ॐ ब्रह्मणे नमः । ब्रह्माणमावाहयामि ।।

ॐ विष्णवे नमः । विष्णुमावाहयामि ।।

ॐ रुद्राय नमः । रुद्रमावाहयामि ।।

ग्रहदेवतावाहनम्

अष्टदळसन्धिष्वीशानादिक्रमेण नवग्रहदेवता आवाहयेत् -

ॐ आ सत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।

हिरण्ययेन सविता रथेना देवो याति भुवना विपश्यन् ।।

अधिदेवताप्रत्यधिदेवतासहिताय सूर्याय नमः । सूर्यमावाहयामि ।।

ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।

अपाগुँ रेताগूँसि जिन्वति ।।

अधिदेवताप्रत्यधिदेवतासहितायअङ्गारकायनमः।

अङ्गारकमावाहयामि ।।

ॐ प्र वश्शुक्राय भानवे भरध्वम्

हव्यं मतिं चाग्नये सुपूतम् ।

यो दैव्यानि मानुषा जनूগूँषि

अन्तर्विश्वानि विद्मना जिगाति ।।

अधिदेवताप्रत्यधिदेवतासहिताय शुक्राय नमः । शुक्रमावाहयामि ।।

ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्णियम् ।

भवा वाजस्य सङ्गथे ।।

अधिदेवताप्रत्यधिदेवतासहिताय सोमाय नमः । सोममावाहयामि ।।

ॐ उद्बुध्यस्वाग्ने प्रतिजागृह्येनमिष्टापूर्ते सगुँसृजेथा मयं च ।
पुनः कृण्वग्गुँस्त्वा पितरं युवानमन्वातागूँसि त्वयि तन्तुमेतम् ।।
अधिदेवताप्रत्यधिदेवतासहिताय बुधाय नमः । बुधमावाहयामि ।।

ॐ बृहस्पते अति यदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छ्वसर्तप्रजात तदस्मासु द्रविणं धेहि चित्रम् ।।
अधिदेवताप्रत्यधिदेवतासहिताय बृहस्पतये नमः ।
बृहस्पतिमावाहयामि ।।

ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये ।
शंयोरभिस्रवन्तु नः ।।
अधिदेवताप्रत्यधिदेवतासहिताय शनैश्चराय नमः ।
शनैश्चरमावाहयामि ।।

ॐ कयानश्चित्र आभुवदूती सदा वृधः सखा ।
कया शचिष्ठया वृता ।।
अधिदेवताप्रत्यधिदेवतासहिताय राहवे नमः । राहुमावाहयामि ।।

ॐ केतुं कृण्वन्न केतवे पेशोमर्या अपेशसे ।
समुषद्भिरजायथाः ।।
अधिदेवताप्रत्यधिदेवतासहिताय केतवे नमः । केतुमावाहयामि ।।

इन्द्राद्यावाहनम्

इन्द्रादीन् आवाहयेत् -

ॐ त्रातारमिन्द्रमवितारमिन्द्रगुँ हवे हवे सुहवगुँ शूरमिन्द्रम् ।
हुवे नु शक्रं पुरुहूतमिन्द्रग्गुँ स्वस्ति नो मघवा धात्विन्द्रः ।।
इन्द्राय नमः । इन्द्रमावाहयामि ।।

ॐ अग्निर्दा द्रविणं वीरपेशा अग्निर् ऋषिं यः सहस्रा सनोति ।
अग्निर्दिवि हव्यमाततानाग्नेर्धामानि विभृता पुरुत्रा ।।
अग्नये नमः । अग्निमावाहयामि ।।

ॐ यमो दाधार पृथिवीं यमो विश्वमिदं जगत् ।
यमाय सर्वमित्त्रस्थे यत्प्राणद्वायुरक्षितम् ।।
यमाय नमः । यममावाहयामि ।।

ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्यां तस्करस्यान्वेषि ।
अन्यमस्मदिच्छ सात इत्या नमो देवि निर्ऋते तुभ्यमस्तु ।।
निरऋतये नमः । निरऋतमावाहयामि ।।

ॐ सदमाधो द्युम्निनीरूर्ज एता अनिभृष्टा अपस्युवो वसानः ।
पस्त्यासु चक्रे वरुणः सधस्थमपागुँ शिशुर्मातृतमास्वन्तः ।।
वरुणाय नमः । वरुणमावाहयामि ।।

ॐ आनो नियुद्भिः शतिनीभिरध्वरम् ।
सहस्रिणीभिरुपयाहि यज्ञम् ।

वायो अस्मिन् हविषि मादयस्व ।
यूयं पात स्वस्तिभिः सदा नः ।। वायवे नमः वायुमावाहयामि ।।

ॐ सोमो धेनुगुँ सोमो अर्वन्तमाशुम् ।
सोमो वीरं कर्मण्यं ददातु ।
सादन्यं विदथ्यगूँ सभेयम् ।
पितुः श्रवणं यो ददाशदस्मै ।।
सोमाय नमः सोममावाहयामि ।

ॐ सहस्राणि सहस्रधा बाहुवोस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि ।।
ईशानाय नमः ईशानमावाहयामि ।

षट्कोणमध्ये पश्चिमादिचतुर्दिक्षु -
गरुडाय नमः । गरुडमावाहयामि ।।
भूम्यै नमः । भूमिमावाहयामि ।।
कामाय नमः । काममावाहयामि ।।
लक्ष्म्यै नमः । लक्ष्मीमावाहयामि ।।
(लक्ष्मीकलशस्थापनपक्षे कलशं संस्थाप्य तत्र लक्ष्मीमावाह्य पूजयेत् ।)

प्रतिमास्थापनम्

कलशे (सुवर्णमयलक्ष्मीनारायण) प्रतिमां विन्यस्य अञ्जलौ पुष्पं गृहीत्वा ध्यायेत् -

ध्यायेत्सत्यं गुणातीतं गुणत्रयसमन्वितम् ।
लोकनाथं त्रिलोकेशं कौस्तुभाभरणं हरिम् ।।
नीलवर्णं पीतवासं श्रीवत्सपदभूषितम् ।
गोविन्दं गोकुलानन्दं ब्रह्माद्यैरपि पूजितम् ।।

ध्यात्वा हृदिस्थंजीवं श्वासमार्गेण पुष्पाञ्जलावागतं विभाव्यावाहयेत्।

आवाहनम्

स्वात्मसंस्थमजं शुद्धं त्वामद्य पुरुषोत्तम ।
अरण्यामिव हव्याशं मूर्तावावाहयाम्यहम् ।।

भूर्भुवःसुवरों सशक्तिसाङ्गसायुधसवाहनसपरिवारं श्री सत्यनारायणं आवाहयिष्ये ।

ॐ सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् ।।
(हिरण्यवर्णागुँ हरिणीगुँ सुवर्णरजतस्रजाम् ।
चन्द्रागुँ हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।।)
आगच्छ देवदेवेश तेजोराशे जगत्पते ।
क्रियमाणमिमां पूजां गृहाण सुरसत्तम ।।

ॐ श्रीसत्यनारायणं सपरिवारं सवाहनं सायुधं साङ्गं सशक्तिकं आवाहयामि । इति तत्पुष्पं समर्पयेत् ।।

ॐ भूः सत्यनारायणमावाहयामि ।
ॐ भुवः सत्यनारायणमावाहयामि ।
ॐ सुवः सत्यनारायणमावाहयामि ।
ॐ भूर्भुवः सुवः सत्यनारायणमावाहयामि । इत्यावाह्य ।
आवाहितो भव । संस्थापितो भव । सन्निहितो भव ।

सन्निरुद्घो भव । सम्मुखीकरणो भव । सुप्रसन्नो भव । क्षमस्व । सान्निध्यं कुरु । षण्मुद्राः प्रदर्श्य प्राणप्रतिष्ठां कुर्यात् -

ॐ आं ह्रीं क्रों सत्यनारायणस्य प्राणा इह प्राणाः ।

ॐ आं ह्रीं क्रों सत्यनारायणस्य जीव इह स्थितः ।

ॐ आं ह्रीं क्रों सत्यनारायणस्य सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्र- जिह्वाघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा इति मूर्तिहृदयं स्पृष्ट्वा त्रिः सकृद्वा जपन्
ॐ असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम् ।
ज्योक्पश्येम सूर्यमुच्चरन्तमनुमते मृडयानः स्वस्ति ।।

इति पठेत् ।। १ ।।

अथ गर्भाधानादि पञ्चदशसंस्कारसिध्यर्थं पञ्चदश प्रणवावृत्तीः कृत्वा आसनाद्युपचारैः पूजयेत् ।।

आसनम्

ॐ पुरुष एवेदगुँ सर्वम् । यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानः । यदन्नेनातिरोहति ।।
(ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यागुँ हिरण्यं विन्देयं गामश्वं पुरुषानहम् ।।)
नानारत्नसमायुक्तं कार्तस्वरविभूषितम् ।
आसनं देव देवेश प्रीत्यर्थं प्रतिगृह्यताम् ।।
श्रीसत्यनारायणाय नमः आसनं समर्पयामि ।। २ ।।

पाद्यम्

ॐ एतावानस्य महिमा । अतो ज्यायागुँश्च पूरुषः ।

पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि ।।
(ॐ अश्वपूर्वागुँ रथमध्यागुँ हस्तिनादप्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् ।।)
गङ्गादिसर्वतीर्थेभ्यो मया प्रार्थनयाहृतम् ।
तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम् ।।
श्रीसत्यनारायणाय नमः । पाद्यं समर्पयामि ।। ३ ।।

अर्घ्यम्

ॐ त्रिपादूर्ध्व उदैत् पुरुषः । पादोऽस्येहाभवात्पुनः ।
ततो विष्वङ्‌व्यक्रामत् । साशनानशने अभि ।।
(ॐ कागुँसोऽस्मि तागुँ हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ।।)
गन्धपुष्पाक्षतोपेतं फलेन च समन्वितम् ।
हेमपात्रे स्थितं तोयं गृहाणार्घ्यं नमोऽस्तु ते ।।
श्रीसत्यनारायणाय नमः । अर्घ्यं समर्पयामि ।। ४ ।।

आचमनम्

ॐ तस्माद्विराडजायत । विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत । पश्चाद् भूमिमथो पुरः ।।
(ॐ चन्द्रां प्रभासां यशसा ज्वलन्तीगुँ श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीगुँ शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे ।।)
कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् ।

आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ।।
श्रीसत्यनारायणाय नमः । आचमनं समर्पयामि ।। ५ ।।

मधुपर्कः

दधि वारि घृतं चैव मधुखण्डविमिश्रितम् ।
तृप्त्यर्थं तव देवेश मधुपर्कं ददाम्यहम् ।।
श्रीसत्यनारायणाय नमः । मधुपर्कं समर्पयामि ।
पुनराचमनं समर्पयामि ।

तैलाभ्यङ्गः

अभ्यङ्गार्थं जगत्पाल तैलं पुष्पादिसम्भवम् ।
सुगन्धद्रव्यसम्मिश्रं सङ्गृहाण सुरेश्वर ।।
श्रीसत्यनारायणाय नमः । तैलाभ्यङ्गं समर्पयामि ।

अङ्गोद्वर्तनम्

अङ्गोद्वर्तनकं देव कस्तूर्यादिविमिश्रितम् ।
लेपनार्थं गृहाणेदं हरिद्राकुङ्कुमैर्युतम् ।।
श्रीसत्यनारायणाय नमः । अङ्गोद्वर्तनं समर्पयामि ।।

उष्णोदकस्नानम्

नानातीर्थादाहृतं च तोयमुष्णं मया कृतम् ।
स्नानार्थं ते प्रयच्छामि स्वीकुरुष्व दयानिधे ।।
श्रीसत्यनारायणाय नमः । उष्णोदकस्नानं समर्पयामि ।।

मलापकर्षस्नानम्

मलापकर्षणस्नानं कारयिष्ये ।
ॐ आपोहिष्ठा मयोभुवः । ता न ऊर्जे दधातन ।
महे रणाय चक्षसे ।।
यो वः शिवतमो रसः । तस्य भाजयते ह नः ।
उशतीरिव मातरः ।।
तस्मा अरङ्गमाम वः । यस्य क्षयाय जिन्वथ ।
आपो जनयथा च नः ।।
जाह्नवीजलमत्यन्तं पवित्रकरणं परम् ।
दत्तं मलापकर्षार्थं स्नानं कुरु जगत्पते ।।
श्रीसत्यनारायणाय नमः । मलापकर्षणस्नानं समर्पयामि ।

पञ्चामृतस्नानम् क्षीरस्नानम्

पञ्चामृतैः स्नापयिष्ये ।
आदौ क्षीरेण स्नापयिष्ये ।
ॐ अप्यायस्व समेतु ते विश्वतः सोम वृष्णियम् ।
भवा वाजस्य सङ्गथे ।।
कामधेनुसमुद्भूतं देवर्षिपितृतृप्तिदम् ।
पयो ददामि देवेश स्नानार्थं प्रतिगृह्यताम् ।।
श्रीसत्यनारायणाय नमः । क्षीरस्नानं समर्पयामि ।

शुद्घोदकस्नानम्

शुद्घोदकेन स्नापयिष्ये ।
ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।

तन्नो विष्णुः प्रचोदयात् ।।

श्रीसत्यनारायणाय नमः । शुद्घोदकस्नानं समर्पयामि ।

दधिस्नानम्

दध्ना स्नापयिष्ये ।

ॐ दधिक्रावण्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।

सुरभिनो मुखा करत्प्रण आयूँगूँषि तारिषत् ।।

चन्द्रमण्डलसङ्काशं सर्वदेवप्रियं दधि ।

स्नानार्थं ते मया दत्तं प्रीत्यर्थं प्रतिगृह्यताम् ।।

श्रीसत्यनारायणाय नमः । दधिस्नानं समर्पयामि ।

शुद्घोदकस्नानम्

शुद्घोदकेन स्नापयिष्ये ।

ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।

तन्नो विष्णुः प्रचोदयात् ।।

श्रीसत्यनारायणाय नमः । शुद्घोदकं समर्पयामि ।

घृतस्नानम्

घृतेन स्नापयिष्ये

ॐ शुक्रमसि ज्योतिरसि तेजोऽसि देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः ।।

आज्यं सुराणामाहार आज्यं यज्ञे प्रतिष्ठितम् ।

आज्यं पवित्रं परमं स्नानार्थं प्रतिगृह्यताम् ।।

श्रीसत्यनारायणाय नमः । घृतस्नानं समर्पयामि ।

शुद्घोदकस्नानम्

शुद्घोदकेन स्नापयिष्ये ।
ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ।।
श्रीसत्यनारायणाय नमः । शुद्घोदकस्नानं समर्पयामि ।

मधुस्नानम्

मधुना स्नापयिष्ये ।
ॐ मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ।।
मधु नक्तमुतोषसि मधुमत्पार्थिवगुँ रजः ।
मधु द्यौरस्तु नः पिता ।।
मधुमान्नो वनस्पतिर्मधुमागुँ अस्तु सूर्यः
माध्वीर्गावो भवन्तु नः ।।
सर्वौषधिसमुत्पन्नं पीयूषसदृशं मधु ।
स्नानार्थं ते प्रयच्छामि गृहाण त्वं सुरेश्वर ।।
श्रीसत्यनारायणाय नमः । मधुस्नानं समर्पयामि ।

शुद्घोदकस्नानम्

शुद्घोदकेन स्नापयिष्ये ।
ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ।।
श्रीसत्यनारायणाय नमः । शुद्घोदकस्नानं समर्पयामि ।

शर्करास्नानम्

शर्करया स्नापयिष्ये ।

ॐ भूर्भुवः सुवः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।

धियो यो नः प्रचोदयात् ।।

अथवा -

स्वादुः पवस्व दिव्याय जन्मने स्वादुरिन्द्राय सहवीतु नाम्ने ।

स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ अदाभ्यः ।।

इक्षुदण्डसमुद्भूतदिव्यशर्करया ह्यहम् ।

स्नापयामि महाभक्त्या प्रीतो भव सुरेश्वर ।।

श्रीसत्यनारायणाय नमः । शर्करास्नानं समर्पयामि ।

शुद्धोदकस्नानम्

शुद्धोदकेन स्नापयिष्ये ।

ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।

तन्नो विष्णुः प्रचोदयात् ।।

शुद्धोदकैः काञ्चनकुम्भसंस्थैः सुवासितैश्चैव सुमन्त्रपूतैः ।

तीर्थाहृतैः संस्नपयामि देव पादाब्जसम्भूतनदीप्रवाहैः ।।

श्रीसत्यनारायणाय नमः । शुद्धोदकस्नानं समर्पयामि ।

क्षीरं दधि घृतं चैव मधु शर्करया ह्यहम् ।

पञ्चामृतं गृहाणेदं जगन्नाथ नमोऽस्तु ते ।।

पञ्चोदकस्नानम्

गन्धोदकस्नानम्

गन्धोदकेन स्नापयिष्ये,

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।

ईश्वरीगूँ सर्वभूतानां तामिहोपह्वये श्रियम् ॥

कर्पूरैलासमायुक्तं सुगन्धद्रव्यसंयुतम् ।

गन्धोदकं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥

श्रीसत्यनारायणाय नमः । गन्धोदकस्नानं समर्पयामि ।

कुशोदकस्नानम्

कुशोदकेन स्नापयिष्ये ।

ॐ शरासः कुशरासो...नृलिप्सत ॥

सुगन्धद्रव्यसम्मिश्रं कुशाग्रेण समन्वितम् ।

कुशोदकं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥

श्रीसत्यनारायणाय नमः । कुशोदकस्नानं समर्पयामि ।

पुष्पोदकस्नानम्

पुष्पोदकेन स्नापयिष्ये ।

ॐ पुष्पावतीः प्रसूवतीः फलिनीरफला उत ।

अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥

नानापरिमळद्रव्यैः सुपुष्पैश्च समन्वितम् ।

पुष्पोदकं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥

श्रीसत्यनारायणाय नमः । पुष्पोदक स्नानं समर्पयामि ।

फलोदकस्नानम्

फलोदकेन स्नापयिष्ये ।

ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिः प्रसूतास्तानो मुञ्चन्त्वगुँहसः ।।
सुफलैश्च फलोदैर्वा फलानां च रसैर्युतम् ।
फलोदकं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ।।
श्रीसत्यनारायणाय नमः । फलोदक स्नानं समर्पयामि ।

रत्नोदकस्नानम्

रत्नोदकेन स्नापयिष्ये ।
ॐ बृहस्पते जुषस्व नो हव्याय विश्वदेव्या ।
रास्व रत्नानि दाशुषे ।।
स्वर्णैर्मुक्ताफलैर्नानारत्नैश्चैव समन्वितम् ।
रत्नोदकं मया दत्तं प्रीत्यर्थं (स्नानार्थं) प्रतिगृह्यताम् ।।
श्रीसत्यनारायणाय नमः । रत्नोदकस्नानं समर्पयामि ।।

पञ्चोपचारपूजा

पञ्चोपचारपूजां करिष्ये ।
लं पृथिव्यात्मने नमः । गन्धं समर्पयामि ।।
हं आकाशात्मने नमः । पुष्पं समर्पयामि ।।
यं वाय्वात्मने नमः । धूपं समर्पयामि ।।
रं तेजोमयात्मने नमः । दीपं समर्पयामि ।।
वं अमृतात्मने नमः । नैवेद्यं समर्पयामि ।।
पञ्चोपचार पूजां समर्पयामि ।।

शुद्घोदकस्नानम्

अथ शुद्घोदकेन स्नापयिष्ये ।।

ॐ यत्पुरुषेण हविषा । देवा यज्ञमतन्वत ।

वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मः शरद्घविः ।।

(ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः । तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ।।)

सर्वतीर्थाह्वतं तोयं मया प्रार्थनया विभो ।

सुवासितं गृहाणेदं सम्यक् स्नातुं सुरेश्वर ।।

श्रीसत्यनारायणाय नमः । शुद्घोदकस्नानं समर्पयामि ।।

महाभिषेकः

महाभिषेकं करिष्ये ।

पुरुष सूक्तेन (श्रीसूक्तेन विष्णुसूक्तेन वा) अतो देवादिषण्मन्त्रैर्वा शङ्खेन महाभिषेकं कुर्यात् ।।

पुरुषसूक्तम्

ॐ सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् ।

स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् ।।

ॐ पुरुष एवेदगुँ सर्वम् । यद्भूतं यच्च भव्यम् ।

उतामृतत्वस्येशानः । यदन्नेनातिरोहति ।।

ॐ एतावानस्य महिमा । अतो ज्यायागुँश्च पूरुषः ।

पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि ।।

ॐ त्रिपादूर्ध्व उदैत् पुरुषः । पादोऽस्येहाभवात्पुनः ।

ततो विष्वङ्यक्रामत् । साशनानशने अभि ।।

ॐ तस्माद्विराडजायत । विराजो अधि पूरुषः ।

स जातो अत्यरिच्यत । पश्चाद् भूमिमथो पुरः ।।
ॐ यत्पुरुषेण हविषा । देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मः शरद्धविः ।।
ॐ सप्तास्यासन् परिधयः । त्रिः सप्त समिधः कृताः ।
देवा यद् यज्ञं तन्वानाः । अबध्नन् पुरुषं पशुम् ।।
ॐ तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ।
तेन देवा अयजन्त । साध्या ऋषयश्च ये ।।
ॐ तस्माद्यज्ञात्सर्वहुतः । सम्भृतं पृषदाज्यम् ।
पशूगुँस्तागुँश्चक्रे वायव्यान् । आरण्यान् ग्राम्यांश्च ये ।।
ॐ तस्माद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे ।
छन्दागूँसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ।।
ॐ तस्मादश्वा अजायन्त । ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः ।।
ॐ यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते ।।
ॐ ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः । पद्भ्यागुँ शूद्रो अजायत ।।
ॐ चन्द्रमा मनसो जातः । चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च । प्राणाद् वायुरजायत ।।
ॐ नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकागुँ अकल्पयन् ।।
ॐ वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तु पारे ।
सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाभिवदन् यदास्ते ।।
ॐ धाता पुरस्ताद् यमुदाजहार । शक्रः प्रविद्वान् प्रदिशश्चतस्रः ।

तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते ।।
ॐ यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्ते । यत्र पूर्वे साध्याः सन्ति देवाः ।।

श्रीसूक्तम्

ॐ हिरण्यवर्णागुँ हरिणीगुँ सुवर्णरजतस्रजाम् ।
चन्द्रागुँ हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।।
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यागुँ हिरण्यं विन्देयं गामश्वं पुरुषानहम् ।।
अश्वपूर्वागु रथमध्यागुँ हस्तिनादप्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् ।।

कागुँसोऽस्मि तागुँ हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ।।

चन्द्रां प्रभासां यशसा ज्वलन्तीगुँ श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीगुँ शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे ।।

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ।।
उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ।।
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वान्निर्णुद मे गृहात् ।।

गन्धद्वारां दुराधर्षां नित्यपुष्टां करिषिणीम् ।
ईश्वरीगूँ सर्वभूतानां तामिहोपह्वये श्रियम् ।।
मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनागुँ रूपमन्नस्य मयि श्रीः श्रयतां यशः।।
कर्दमेन प्रजा भूता मयि सम्भव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ।।
आपः स्रजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरगुँ श्रियं वासय मे कुले ।।
आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रागुँ हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।।
आर्द्रां यः करिणीं यष्टिं सुवर्णागूँ हेममालिनीम् ।
सूर्यागुँ हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।।
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यागुँ हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ।।
यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चञ्च श्रीकामः सततं जपेत् ।।

विष्णुसूक्तम्

ॐ विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि वि ममे रजागूँसि
यो अस्कभा यदुत्तरगुँ सधस्थं विचक्रमाणस्त्रेधोरुगायः ।।

तदस्य प्रियमभि पाथो अश्याम् । नरो यत्र देवयवो मदन्ति ।
उरुक्रमस्य स हि बन्धुरित्था । विष्णोः पदे परमे मध्व उत्सः ।।

प्र तद् विष्णुस्तवते वीर्याय । मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा ।।
परो मात्रया तनुवा वृधान । न ते महित्वमन्वश्नुवन्ति ।
उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वम् । परमस्य वित्से ।।
वि चक्रमे पृथिवीमेष एताम् । क्षेत्राय विष्णुर्मनुषे दशस्यन् ।
ध्रुवासो अस्य कीरयो जनासः । उरुक्षितिगुँ सुजनिमा चकार ।।
त्रिर्देवः पृथिवीमेष एताम् । वि चक्रमे शतर्चसं महित्वा ।
प्रविष्णुरस्तु तवसस्तवीयान् । त्वेषग्गुँ ह्यस्य स्थविरस्य नाम ।।

ॐ अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे ।
पृथिव्याः सप्त धामभिः ।। १ ।।
ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पागुँसुरे ।। २ ।।
ॐ त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः ।
अतो धर्माणि धारयन् ।। ३ ।।
ॐ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ।
इन्द्रस्य युज्यः सखा ।। ४ ।।
ॐ तद्विष्णोः परमं पदगुँ सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ।। ५ ।।
तद्विप्रासो विपन्यवो जागृवागुँसः समिन्धते ।
विष्णोर्यत् परमं पदम् ।। ६ ।।

सूक्तमन्त्रेण गन्धेन तुलस्या च समन्वितम् ।
महाभिषेकं शङ्खेन करोमि तव तुष्टये ।।

श्रीसत्यनारायणाय नमः । महाभिषेकस्नानं समर्पयामि ।
स्नानानन्तरमाचमनं समर्पयामि ।।

ॐ ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ।
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ।।
श्रीसत्यनारायणाय नमः । सुप्रतिष्ठितमस्तु ।। ७ ।।

वस्त्रयुग्मम्

ॐ तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ।
तेन देवा अयजन्त । साध्या ऋषयश्च ये ।।
(ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ।।)
तप्तकाञ्चनवर्णाभं पट्टोर्णं मृदुलं शुभम् ।
वस्त्रयुग्मं मया दत्तं गृहाण जगदीश्वर ।।
श्रीसत्यनारायणाय नमः । वस्त्रयुग्मं समर्पयामि ।
आचमनं समर्पयामि ।। ८ ।।

यज्ञोपवीतम्

ॐ तस्माद्यज्ञात्सर्वहुतः । सम्भृतं पृषदाज्यम् ।
पशूगुँस्तागुँश्चक्रे वायव्यान् । आरण्यान् ग्राम्यांश्च ये ।।
(ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वान्निर्णुद मे गृहात् ।।)
ब्रह्मविष्णुमहेशैश्च निर्मितं ब्रह्मसूत्रकम् ।
यज्ञोपवीतं तद्दानात् प्रीयतां कमलापतिः ।।

श्रीसत्यनारायणाय नमः । यज्ञोपवीतं समर्पयामि ।
आचमनं समर्पयामि ।। ९ ।।

अलङ्काराः

कटिसूत्राङ्गुलीये च कुण्डलं मुकुटं तथा ।
केयूरं कौस्तुभं हारं गृहाण पुरुषोत्तम ।।
श्रीसत्यनारायणाय नमः । अलङ्कारान् समर्पयामि ।।

गन्धः

ॐ तस्माद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे ।
छन्दाँसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ।।
(ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करिषिणीम् ।
ईश्वरीगूँ सर्वभूतानां तामिहोपह्वये श्रियम् ।।)
श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ।।
श्रीसत्यनारायणाय नमः । गन्धं समर्पयामि ।।

गोरोचनं चन्दनदेवदारु कर्पूरकृष्णागरुनागराणि ।
कस्तूरिकाकेसरमिश्रितानि गृहाण देवेश मयार्पितानि ।।
श्रीसत्यनारायणाय नमः । अष्टगन्धं समर्पयामि ।। १० ।।

सौभाग्यद्रव्यमन्त्राः

कञ्चुकम्

मुक्तामणिगणाकीर्णं नानावर्णविचित्रितम् ।
दिव्यं परमशोभाढ्यं कञ्चुकं देवि धार्यताम् ।।
श्रीलक्ष्मै नमः । कञ्चुकं समर्पयामि ।।

नासामौक्तिकम्

नासिकाभरणं दिव्यं काञ्चनेन समन्वितम् ।
नासामुक्तां मया दत्तां गृहाण त्वं सुशोभने ।।
श्रीलक्ष्म्यै नमः । नासामुक्तां समर्पयामि ।।

तालपत्रम्

ताडपत्रं मया देवि हेमनिर्मितमुत्तमम् ।
कर्णयोर्भूषणं दत्तं गृहाण जगदम्बिके ।।
श्रीलक्ष्म्यै नमः । ताडपत्रं समर्पयामि ।।

कङ्कणम्

काचेन निर्मितं दिव्यं कङ्कणं च सुरेश्वरि ।
हस्तालङ्करणार्थाय गृहाण जगदम्बिके ।।
श्रीलक्ष्म्यै नमः । कङ्कणं समर्पयामि ।।

कण्ठसूत्रम्

माङ्गल्यतन्तुमणिभिर्युक्तं मुक्ताविराजितम् ।
कण्ठसूत्रं मया दत्तं गृहाण जगदम्बिके ।।
श्रीलक्ष्म्यै नमः । कण्ठसूत्रं समर्पयामि ।।

कण्ठमाला

कृष्णैश्च काचमणिभिः स्यूतं ग्रैवेयकं तथा।
दास्यामि कण्ठमालार्थं प्रत्यङ्गे कमले तव ।।
श्रीलक्ष्म्यै नमः । कण्ठमालां समर्पयामि ।।

हरिद्रा

हरिद्रां मङ्गले कार्ये गृहीता मुनिदैवतैः ।
मातर्गृहाण सुस्निग्धां मुखचन्द्रानुरञ्जनीम् ।।
श्रीलक्ष्म्यै नमः । हरिद्रां समर्पयामि ।।

कुङ्कुमम्

कुङ्कुमं सर्वसौभाग्यसूचकं भालभूषणम् ।
स्वीकुरुष्व जगन्मातर्जपाकुसुमसन्निभम् ।।
श्रीलक्ष्म्यै नमः । कुङ्कुमं समर्पयामि ।।

कज्जलम्

कज्जलं नवनीताढ्यं शुद्धकर्पूरमिश्रितम् ।
गृहाण नेत्रभूषार्थं दत्तं स्वर्णशलाकया।।
श्रीलक्ष्म्यै नमः । कज्जलं समर्पयामि ।।

सिन्धूरम्

सिन्धूरं नागसम्भूतं स्त्रीणां सीमन्तभूषणम् ।
मातर्ददामि ते प्रीत्यै गृहाण जगदम्बिके ।।
श्रीलक्ष्म्यै नमः । सिन्धूरं समर्पयामि ।।
नानाविधसौभाग्यद्रव्याणि समर्पयामि ।।

परिमलद्रव्यम्

ज्योत्स्नापते नमस्तुभ्यं नमस्ते विश्वरूपिणे ।
नानापरिमळद्रव्यं गृहाण पुरुषोत्तम ।।

श्रीसत्यनारायणाय नमः । नानापरिमळद्रव्यं समर्पयामि ।

अक्षताः

श्वेततण्डुलसंयुक्तान् कुङ्कुमेन विराजितान् ।
अक्षतान् गृह्यतां देव (स्वीकुरु प्रीत्यै) नारायण नमोऽस्तु ते ।।
श्रीसत्यनारायणाय नमः । अक्षतान् समर्पयामि ।।

पुष्पाणि

ॐ तस्मादश्वा अजायन्त । ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः ।।
(ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनागुँ रूपमन्नस्य मयि श्रीः श्रयतां यशः।।)
मल्लिकादिसुगन्धीनि मालत्यादीनि वै प्रभो।
मयाहृतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम् ।।
श्रीसत्यनारायणाय नमः । पुष्पाणि समर्पयामि ।। १० ।।

वैजयन्तीमाला

तुलसीकुन्दमन्दारपारिजाताम्बुजैः कृताम् ।
वैजयन्तीमिमां मालां तव कण्ठेऽर्पयाम्यहम् ।।
श्रीसत्यनारायणाय नमः । वैजयन्तीमालां समर्पयामि ।।

वनमाला

वनमालां सुगन्धाढ्यां नानापुष्पैः समन्विताम् ।
पूजार्थे साधितां देव प्रीत्यर्थं प्रतिगृह्यताम् ।।

श्रीसत्यनारायणाय नमः । वनमालां समर्पयामि ।।

पत्रपूजा

ॐ श्रीकृष्णाय नमः । पलाशपत्रं समर्पयामि ।।

ॐ विष्णवे नमः । औदुम्बरपत्रं समर्पयामि ।।

ॐ हरये नमः । अश्वत्थपत्रं समर्पयामि ।।

ॐ शम्भवे नमः । भृङ्गराजपत्रं समर्पयामि ।।

ॐ ब्रह्मणे नमः । शमीपत्रं समर्पयामि ।।

ॐ शेषाय नमः । कपित्थपत्रं समर्पयामि ।।

ॐ भास्कराय नमः । अशोकपत्रं समर्पयामि ।।

ॐ सर्वव्यापिने नमः । वटपत्रं समर्पयामि ।।

ॐ सृष्टिकर्त्रे नमः । करवीरपत्रं समर्पयामि ।।

ॐ स्थितिकर्त्रे नमः । पुन्नागपत्रं समर्पयामि ।।

ॐ ईश्वराय नमः । आम्रपत्रं समर्पयामि ।।

ॐ अच्युताय नमः । तुलसीपत्रं समर्पयामि ।।

पत्रपूजां समर्पयामि ।।

पुष्पपूजा

ॐ अनन्ताय नमः। पद्मपुष्पं समर्पयामि।।

ॐ विष्णवे नमः । जातीपुष्पं समर्पयामि ।।

ॐ अव्यक्ताय नमः । कल्हारपुष्पं समर्पयामि ।।

ॐ केशवाय नमः । चम्पकापुष्पं समर्पयामि ।।

ॐ सहस्रजिते नमः । केसरीपुष्पं समर्पयामि ।।

ॐ इष्टाय नमः । बकुलपुष्पं समर्पयामि ।।

ॐ विशिष्टाय नमः । पुन्नागपुष्पं समर्पयामि ।।

ॐ शिष्टेष्टाय नमः । करवीरपुष्पं समर्पयामि ।।

ॐ शिखण्डिने नमः । धत्तूरपुष्पं समर्पयामि ।।

ॐ नहुषाय नमः । नन्द्यावर्तपुष्पं समर्पयामि ।।

ॐ महीधराय नमः । मालतीपुष्पं समर्पयामि ।।

ॐ विश्वबाहवे नमः । मल्लिकापुष्पं समर्पयामि ।।

पुष्पपूजां समर्पयामि ।।

अङ्गपूजा

ॐ सत्यनारायणाय नमः। पादौ पूजयामि ।।

ॐ सङ्कर्षणाय नमः । गुल्फौ पूजयामि ।।

ॐ कालात्मने नमः । जङ्घे पूजयामि ।।

ॐ विश्वरूपिणे नमः । जानूनी पूजयामि ।।

ॐ कृष्णाय नमः । उरू पूजयामि ।।

ॐ प्रद्युम्नाय नमः । गुह्यं पूजयामि ।।

ॐ विश्वाय नमः । कटिं पूजयामि ।।

ॐ पद्मनाभाय नमः । नाभिं पूजयामि ।।

ॐ दामोदराय नमः । उदरं पूजयामि ।।

ॐ परमात्मने नमः । हृदयं पूजयामि ।।

ॐ मुकुन्दाय नमः । स्तनौ पूजयामि ।।

ॐ कम्बुग्रीवाय नमः । कण्ठं पूजयामि ।।

ॐ सर्वव्यापिने नमः । स्कन्धौ पूजयामि ।।

ॐ चतुर्बाहवे नमः । बाहून् पूजयामि ।।

ॐ सर्वास्त्रधारिणे नमः। हस्तान् पूजयामि ।।

ॐ वाचस्पतये नमः । मुखं पूजयामि ।।

ॐ हरये नमः । जिह्वां पूजयामि ।।

ॐ दानवारये नमः । दन्तान् पूजयामि ।।

ॐ पुरुषोत्तमाय नमः । नासिकां पूजयामि ।।

ॐ अच्युताय नमः । कर्णौ पूजयामि ।।

ॐ सहस्राक्षाय नमः । नेत्रे पूजयामि ।।

ॐ लोकरक्षकाय नमः । भ्रुवौ पूजयामि ।।

ॐ केशवाय नमः । ललाटं पूजयामि ।।

ॐ सर्वात्मने नमः । शिरः पूजयामि ।।

श्रीसत्यनारायणाय नमः । सर्वाङ्गं पूजयामि ।।

अङ्गपूजां समर्पयामि ।।

आवरणपूजा

प्रथमावरणपूजा

प्रथमावरणपूजां करिष्ये ।

षट्कोणमध्ये, ॐ श्रीसत्यनारायणाय नमः ।।

पुरतः पश्चिमे, ॐ गरुडाय नमः ।।

तदुत्तरे, ॐ भूम्यै नमः ।।

तत्पूर्वे, ॐ कामाय नमः ।।

तद्दक्षिणे, ॐ लक्ष्म्यै नमः ।।

दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ।।

भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ।।

अनेन प्रथमावरणार्चनेन श्रीसत्यनारायणः प्रीयताम् ।।

तुलसीपुष्पकुङ्कुमाक्षतजलान्यर्पयेत् ।। १ ।।

द्वितीयावरणपूजा

द्वितीयावरणपूजां करिष्ये ।

षट्कोणे पूर्वादिक्रमेण,

ॐ गणेशाय नमः ।

ॐ गौर्यै नमः ।

ॐ वाण्यै नमः ।

ॐ ब्रह्मणे नमः ।

ॐ विष्णवे नमः ।

ॐ रुद्राय नमः ।।

दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ।

भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ।।

अनेन द्वितीयावरणपूजनेन श्रीसत्यनारायणः प्रीयताम् ।। २ ।।

तृतीयावरणपूजा

तृतीयावरणपूजां करिष्ये ।

अष्टदलसन्धिषु ईशानादिक्रमेण,

ॐ सूर्याय नमः ।

ॐ चन्द्राय नमः ।

ॐ कुजाय नमः ।

ॐ बुधाय नमः ।

ॐ गुरवे नमः ।

ॐ शुक्राय नमः ।

ॐ शनैश्चराय नमः ।

ॐ राहवे नमः ।

ॐ केतवे नमः ।।

दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ।

भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् ।।

अनेन तृतीयावरणपूजनेन श्रीसत्यनारायणः प्रीयताम् ।। ३ ।।

चतुर्थावरणपूजा

चतुर्थावरणपूजां करिष्ये ।

अष्टदलेषु पूर्वादिक्रमेण,

ॐ इन्द्राय नमः ।

ॐ अग्नये नमः ।

ॐ यमाय नमः ।

ॐ निर्ऋतये नमः ।

ॐ वरुणाय नमः ।

ॐ वायवे नमः ।

ॐ सोमाय नमः ।

ॐ ईशानाय नमः ।।

दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ।

भक्त्या समर्पये चतुर्थावरणार्चनम् ।।

अनेन चतुर्थावरणपूजनेन श्रीसत्यनारायणः प्रीयताम् ।। ४ ।।

पञ्चमावरणपूजा

पञ्चमावरणपूजां करिष्ये ।

दळाग्रेषु पूर्वादिक्रमेण,

ॐ वज्राय नमः ।

ॐ शक्तये नमः ।

ॐ दण्डाय नमः ।

ॐ खड्गाय नमः ।

ॐ पाशाय नमः ।

ॐ अङ्कुशाय नमः ।

ॐ गदायै नमः ।

ॐ शूलाय नमः ।

दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ।

भक्त्या समर्पये तुभ्यं पञ्चमावरणार्चनम् ।।

अनेन पञ्चमावरणार्चनेन श्रीसत्यनारायणः प्रीयताम् ।।

आवरण पूजां समर्पयामि ।। ५ ।।

द्वादशनामपूजा

द्वादशनामपूजां करिष्ये

ॐ केशवाय नमः ।

ॐ नारायणाय नमः ।

ॐ माधवाय नमः ।

ॐ गोविन्दाय नमः ।

ॐ विष्णवे नमः ।

ॐ मधुसूदनाय नमः ।

ॐ त्रिविक्रमाय नमः ।

ॐ वामनाय नमः ।

ॐ श्रीधराय नमः ।

ॐ हृषीकेशाय नमः ।

ॐ पद्मनाभाय नमः ।

ॐ दामोदराय नमः ।

द्वादशनामपूजां समर्पयामि ।।

तुलसीपत्रपूजा

तुलसीपत्रपूजां करिष्ये ।

ॐ संकर्षणाय नमः ।

ॐ वासुदेवाय नमः ।

ॐ प्रद्युम्नाय नमः ।

ॐ अनिरुद्घाय नमः ।

ॐ पुरुषोत्तमाय नमः ।

ॐ अधोक्षजाय नमः ।

ॐ नारसिंहाय नमः ।

ॐ अच्युताय नमः ।

ॐ जनार्दनाय नमः ।

ॐ उपेन्द्राय नमः ।

ॐ हरये नमः ।

ॐ श्रीकृष्णाय नमः ।

तुलसीपत्रपूजां समर्पयामि ।

अष्टोत्तरशतनाम पूजा

अष्टोत्तरशतनाम पूजां करिष्ये ।

अस्य श्रीनारायणाष्टोत्तरशतनामस्तोत्रमन्त्रस्य ।

श्रीवेदव्यास ऋषिः। अनुष्टुप् छन्दः । श्रीनारायणो देवता ।

अं बीजम्। उं शक्तिः । मं कीलकम् । श्रीसत्यनारायणप्रीत्यर्थे अष्टोत्तरशतनामपूजने विनियोगः ।

(प्रतिनाम तुलसीदलैर्बिल्वपत्रैर्विविधैः पुष्पैः सकुङ्कुमाक्षतैर्वा पूजयेत्)

ॐ नारायणाय नमः ।
ॐ नराय नमः ।
ॐ शौरये नमः ।
ॐ चक्रपाणये नमः ।
ॐ जनार्दनाय नमः ।
ॐ वासुदेवाय नमः ।
ॐ जगद्योनये नमः ।
ॐ वामनाय नमः ।
ॐ ज्ञानपञ्जराय नमः ।
ॐ श्रीवल्लभाय नमः ।। १० ।।
ॐ जगन्नाथाय नमः ।
ॐ चतुर्मूर्तये नमः ।
ॐ चतुर्भुजाय नमः ।
ॐ देवदेवाय नमः ।
ॐ हृषीकेशाय नमः ।
ॐ गोविन्दाय नमः ।
ॐ गरुडध्वजाय नमः ।
ॐ नारसिंहाय नमः ।
ॐ महातेजसे नमः ।
ॐ स्वयम्भुवे नमः ।। २० ।।

ॐ भुवनेश्वराय नमः ।

ॐ श्रीधराय नमः ।

ॐ देवकीपुत्राय नमः ।

ॐ पार्थसारथये नमः ।

ॐ अच्युताय नमः ।

ॐ शङ्खपाणये नमः ।

ॐ परञ्ज्योतिषे नमः ।

ॐ आत्मज्योतिषे नमः ।

ॐ अचञ्चलाय नमः ।

ॐ श्रीवत्साङ्काय नमः ।। ३० ।।

ॐ अखिलाधाराय नमः ।

ॐ सर्वलोकधराय नमः ।

ॐ प्रभवे नमः ।

ॐ त्रिविक्रमाय नमः ।

ॐ त्रिकालज्ञाय नमः ।

ॐ त्रिधाम्ने नमः ।

ॐ करुणाकराय नमः ।

ॐ सर्वज्ञाय नमः ।

ॐ सर्वगाय नमः ।

ॐ सर्वाय नमः ।। ४० ।।

ॐ सर्वेशाय नमः ।

ॐ सर्वसाक्षिकाय नमः ।

ॐ हयग्रीवाय नमः ।

ॐ हरये नमः ।

ॐ शार्ङ्गिणे नमः ।

ॐ हरिकेशाय नमः ।

ॐ हलायुधाय नमः ।

ॐ सहस्रबाहवे नमः ।

ॐ अव्यक्ताय नमः ।

ॐ सहस्राक्षाय नमः ।। ५० ।।

ॐ क्षराय नमः ।

ॐ अक्षराय नमः ।

ॐ गजेन्द्रघ्नाय नमः ।

ॐ गजार्तिघ्नाय नमः ।

ॐ केशवाय नमः ।

ॐ केशिमर्दनाय नमः ।

ॐ कैटभारये नमः ।

ॐ अविद्यारये नमः ।

ॐ कामदाय नमः ।

ॐ कमलेक्षणाय नमः ।। ६० ।।

ॐ कंसशत्रवे नमः ।

ॐ अघामित्राय नमः ।

ॐ काकुत्स्थाय नमः ।

ॐ खगवाहनाय नमः ।

ॐ नीलाम्बुदद्युतये नमः ।

ॐ नित्याय नमः ।

ॐ नित्यतृप्ताय नमः ।

ॐ निराश्रयाय नमः ।

ॐ नित्यानन्दाय नमः ।

ॐ सुराध्यक्षाय नमः ।। ७० ।।

ॐ निर्विकल्पाय नमः ।

ॐ निरञ्जनाय नमः

ॐ ब्रह्मण्याय नमः ।

ॐ पृथिवीनाथाय नमः ।

ॐ पीतवाससे नमः ।

ॐ गुहाशयाय नमः ।

ॐ वेदगर्भाय नमः ।

ॐ विभवे नमः ।

ॐ विष्णवे नमः ।

ॐ श्रीमते नमः ।। ८० ।।

ॐ त्रैलोक्यभूषणाय नमः ।

ॐ यज्ञमूर्तये नमः ।

ॐ अमेयात्मने नमः ।

ॐ वरदाय नमः ।

ॐ वासवानुजाय नमः ।

ॐ जितेन्द्रियाय नमः ।

ॐ जितक्रोधाय नमः ।

ॐ समदृष्टये नमः ।

ॐ सनातनाय नमः ।

ॐ भक्तप्रियाय नमः ।। ९० ।।

ॐ जगत्पूज्याय नमः ।

ॐ परमात्मने नमः ।

ॐ असुरान्तकाय नमः ।

ॐ अनन्ताय नमः ।

ॐ सर्वलोकानामन्तकाय नमः ।

ॐ अनन्तविक्रमाय नमः ।

ॐ मायाधाराय नमः ।

ॐ निराधाराय नमः ।

ॐ सर्वाधाराय नमः ।

ॐ धराधराय नमः ।। १०० ।।

ॐ निष्कलङ्काय नमः ।

ॐ निराभासाय नमः ।

ॐ निष्प्रपञ्चाय नमः ।

ॐ निराश्रयाय नमः ।

ॐ भक्तवश्याय नमः ।

ॐ महादेवाय नमः ।

ॐ पुण्यकीर्तये नमः ।

ॐ पुरातनाय नमः ।। १०८ ।।

नारायणाष्टोत्तरशतनामपूजां समर्पयामि ।

सहस्रनामपूजा

सहस्रनामपूजां करिष्ये ।

अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमहामन्त्रस्य वेदव्यासो भगवान् ऋषिः । अनुष्टुप् छन्दः । श्रीमहाविष्णुः परमात्मा श्रीमन्नारायणो देवता । अमृतांशूद्भवो भानुरिति बीजम् । देवकीनन्दनः स्रष्टेति शक्तिः । उद्भवः क्षोभणो देव

इति परमो मन्त्रः । शङ्खभृन्नन्दकी चक्रीति कीलकम् । शार्ङ्गधन्वा गदाधर इत्यस्त्रम् । रथाङ्गपाणिरक्षोभ्य इति नेत्रम् । त्रिसामा सामगः सामेति कवचम् । आनन्दं परब्रह्मेति योनिः । ऋतुः सुदर्शनः काल इति दिग्बन्धः । श्रीविश्वरूप इति ध्यानम् । श्रीमहाविष्णु (सत्यनारायण)प्रीत्यर्थे सहस्रनामपूजने विनियोगः ।

ॐ विश्वस्मै नमः

ॐ विष्णवे नमः

ॐ वषट्काराय नमः

ॐ भूतभव्यभवत्प्रभवे नमः

ॐ भूतकृते नमः

ॐ भूतभृते नमः

ॐ भावाय नमः

ॐ भूतात्मने नमः

ॐ भूतभावनाय नमः

ॐ पूतात्मने नमः

ॐ परमात्मने नमः

ॐ मुक्तानां परमायै गतये नमः

ॐ अव्ययाय नमः

ॐ पुरुषाय नमः

ॐ साक्षिणे नमः

ॐ क्षेत्रज्ञाय नमः

ॐ अक्षराय नमः

ॐ योगाय नमः

ॐ योगविदां नेत्रे नमः

ॐ प्रधानपुरुषेश्वराय नमः

ॐ नारसिंहवपुषे नमः

ॐ श्रीमते नमः

ॐ केशवाय नमः

ॐ पुरुषोत्तमाय नमः

ॐ सर्वस्मै नमः

ॐ शर्वाय नमः

ॐ शिवाय नमः

ॐ स्थाणवे नमः

ॐ भूतादये नमः

ॐ निधयेऽव्ययाय नमः

ॐ सम्भवाय नमः

ॐ भावनाय नमः

ॐ भर्त्रे नमः

ॐ प्रभवाय नमः

ॐ प्रभवे नमः

ॐ ईश्वराय नमः

ॐ स्वयम्भुवे नमः

ॐ शम्भवे नमः

ॐ आदित्याय नमः

ॐ पुष्कराक्षाय नमः

ॐ महास्वनाय नमः

ॐ अनादिनिधनाय नमः

ॐ धात्रे नमः

ॐ विधात्रे नमः

ॐ धातुरुत्तमाय नमः

ॐ अप्रमेयाय नमः

ॐ हृषीकेशाय नमः

ॐ पद्मनाभाय नमः

ॐ अमरप्रभवे नमः

ॐ विश्वकर्मणे नमः

ॐ मनवे नमः

ॐ त्वष्ट्रे नमः

ॐ स्थविष्ठाय नमः

ॐ स्थविराय नमः

ॐ स्थविराय ध्रुवाय नमः

ॐ अग्राह्याय नमः

ॐ शाश्वताय नमः

ॐ कृष्णाय नमः

ॐ लोहिताक्षाय नमः

ॐ प्रतर्दनाय नमः

ॐ प्रभूताय नमः

ॐ त्रिककुब्धाम्ने नमः

ॐ पवित्राय नमः

ॐ मङ्गलाय परस्मै नमः

ॐ ईशानाय नमः

ॐ प्राणदाय नमः

ॐ प्राणाय नमः

ॐ ज्येष्ठाय नमः

ॐ श्रेष्ठाय नमः

ॐ प्रजापतये नमः

ॐ हिरण्यगर्भाय नमः

ॐ भूगर्भाय नमः

ॐ माधवाय नमः

ॐ मधुसूदनाय नमः

ॐ ईश्वराय नमः

ॐ विक्रमिणे नमः

ॐ धन्विने नमः

ॐ मेधाविने नमः

ॐ विक्रमाय नमः

ॐ क्रमाय नमः

ॐ अनुत्तमाय नमः

ॐ दुराधर्षाय नमः

ॐ कृतज्ञाय नमः

ॐ कृतये नमः

ॐ आत्मवते नमः

ॐ सुरेशाय नमः

ॐ शरणाय नमः

ॐ शर्मणे नमः

ॐ विश्वरेतसे नमः

ॐ प्रजाभवाय नमः

ॐ अह्ने नमः

ॐ संवत्सराय नमः

ॐ व्यालाय नमः

ॐ प्रत्ययाय नमः

ॐ सर्वदर्शनाय नमः

ॐ अजाय नमः

ॐ सर्वेश्वराय नमः

ॐ सिद्धाय नमः

ॐ सिद्धये नमः

ॐ सर्वादये नमः

ॐ अच्युताय नमः १००

ॐ वृषाकपये नमः

ॐ अमेयात्मने नमः

ॐ सर्वयोगविनिस्सृताय नमः

ॐ वसवे नमः

ॐ वसुमनसे नमः

ॐ सत्याय नमः

ॐ समात्मने नमः

ॐ असम्मिताय नमः

ॐ समाय नमः

ॐ अमोघाय नमः

ॐ पुण्डरीकाक्षाय नमः

ॐ वृषकर्मणे नमः

ॐ वृषाकृतये नमः

ॐ रुद्राय नमः

ॐ बहुशिरसे नमः

ॐ बभ्रवे नमः

ॐ विश्वयोनये नमः

ॐ शुचिश्रवसे नमः

ॐ अमृताय नमः

ॐ शाश्वतस्थाणवे नमः

ॐ वरारोहाय नमः

ॐ महातपसे नमः

ॐ सर्वगाय नमः

ॐ सर्वविद्भानवे नमः

ॐ विष्वक्सेनाय नमः

ॐ जनार्दनाय नमः

ॐ वेदाय नमः

ॐ वेदविदे नमः

ॐ अव्यङ्गाय नमः

ॐ वेदाङ्गाय नमः

ॐ वेदविदे नमः

ॐ कवये नमः

ॐ लोकाध्यक्षाय नमः

ॐ सुराध्यक्षाय नमः

ॐ धर्माध्यक्षाय नमः

ॐ कृताकृताय नमः

ॐ चतुरात्मने नमः

ॐ चतुर्व्यूहाय नमः

ॐ चतुर्दंष्ट्राय नमः

ॐ चतुर्भुजाय नमः

ॐ भ्राजिष्णवे नमः

ॐ भोजनाय नमः

ॐ भोक्त्रे नमः

ॐ सहिष्णवे नमः

ॐ जगदादिजाय नमः

ॐ अनघाय नमः

ॐ विजयाय नमः

ॐ जेत्रे नमः

ॐ विश्वयोनये नमः

ॐ पुनर्वसवे नमः

ॐ उपेन्द्राय नमः

ॐ वामनाय नमः

ॐ प्रांशवे नमः

ॐ अमोघाय नमः

ॐ शुचये नमः

ॐ ऊर्जिताय नमः

ॐ अतीन्द्राय नमः

ॐ सङ्ग्रहाय नमः

ॐ सर्गाय नमः

ॐ धृतात्मने नमः

ॐ नियमाय नमः

ॐ यमाय नमः

ॐ वेद्याय नमः

ॐ वैद्याय नमः

ॐ सदायोगिने नमः

ॐ वीरघ्ने नमः

ॐ माधवाय नमः

ॐ मधवे नमः

ॐ अतीन्द्रियाय नमः

ॐ महामायाय नमः

ॐ महोत्साहाय नमः

ॐ महाबलाय नमः

ॐ महाबुद्धये नमः

ॐ महावीर्याय नमः

ॐ महाशक्तये नमः

ॐ महाद्युतये नमः

ॐ अनिर्देश्यवपुषे नमः

ॐ श्रीमते नमः

ॐ अमेयात्मने नमः

ॐ महाद्रिधृते नमः

ॐ महेष्वासाय नमः

ॐ महीभर्त्रे नमः

ॐ श्रीनिवासाय नमः

ॐ सतां गतये नमः

ॐ अनिरुद्धाय नमः

ॐ सुरानन्दाय नमः

ॐ गोविन्दाय नमः

ॐ गोविदां पतये नमः

ॐ मरीचये नमः

ॐ दमनाय नमः

ॐ हंसाय नमः

ॐ सुपर्णाय नमः

ॐ भुजगोत्तमाय नमः

ॐ हिरण्यनाभाय नमः

ॐ सुतपसे नमः

ॐ पद्मनाभाय नमः

ॐ प्रजापतये नमः

ॐ अमृत्यवे नमः

ॐ सर्वदृशे नमः

ॐ सिंहाय नमः २००

ॐ सन्धात्रे नमः

ॐ सन्धिमते नमः

ॐ स्थिराय नमः

ॐ अजाय नमः

ॐ दुर्मर्षणाय नमः

ॐ शास्त्रे नमः

ॐ विश्रुतात्मने नमः

ॐ सुरारिघ्ने नमः

ॐ गुरवे नमः

ॐ गुरुतमाय नमः

ॐ धाम्ने नमः

ॐ सत्याय नमः

ॐ सत्यपराक्रमाय नमः

ॐ निमिषाय नमः

ॐ अनिमिषाय नमः

ॐ स्रग्विणे नमः

ॐ वाचस्पतय उदारधिये नमः

ॐ अग्रण्ये नमः

ॐ ग्रामण्ये नमः

ॐ श्रीमते नमः

ॐ न्यायाय नमः

ॐ नेत्रे नमः

ॐ समीरणाय नमः

ॐ सहस्रमूर्ध्ने नमः

ॐ विश्वात्मने नमः

ॐ सहस्राक्षाय नमः

ॐ सहस्रपदे नमः

ॐ आवर्तनाय नमः

ॐ निवृत्तात्मने नमः

ॐ संवृताय नमः

ॐ सम्प्रमर्दनाय नमः

ॐ अहस्संवर्तकाय नमः

ॐ वह्नये नमः

ॐ अनिलाय नमः

ॐ धरणीधराय नमः

ॐ सुप्रसादाय नमः

ॐ प्रसन्नात्मने नमः

ॐ विश्वधृषे नमः

ॐ विश्वभुजे नमः

ॐ विभवे नमः

ॐ सत्कर्त्रे नमः

ॐ सत्कृताय नमः

ॐ साधवे नमः

ॐ जह्नवे नमः

ॐ नारायणाय नमः

ॐ नराय नमः

ॐ असंख्येयाय नमः

ॐ अप्रमेयात्मने नमः

ॐ विशिष्टाय नमः

ॐ शिष्टकृते नमः

ॐ शुचये नमः

ॐ सिद्घार्थाय नमः

ॐ सिद्घसङ्कल्पाय नमः

ॐ सिद्घिदाय नमः

ॐ सिद्घिसाधनाय नमः

ॐ वृषाहिणे नमः

ॐ वृषभाय नमः

ॐ विष्णवे नमः

ॐ वृषपर्वणे नमः

ॐ वृषोदराय नमः

ॐ वर्धनाय नमः

ॐ वर्धमानाय नमः

ॐ विविक्ताय नमः

ॐ श्रुतिसागराय नमः

ॐ सुभुजाय नमः

ॐ दुर्धराय नमः

ॐ वाग्मिने नमः

ॐ महेन्द्राय नमः

ॐ वसुदाय नमः

ॐ वसवे नमः

ॐ नैकरूपाय नमः

ॐ बृहद्रूपाय नमः

ॐ शिपिविष्टाय नमः

ॐ प्रकाशनाय नमः

ॐ ओजस्तेजोद्युतिधराय नमः

ॐ प्रकाशात्मने नमः

ॐ प्रतापनाय नमः

ॐ ऋद्घाय नमः

ॐ स्पष्टाक्षराय नमः

ॐ मन्त्राय नमः

ॐ चन्द्रांशवे नमः

ॐ भास्करद्युतये नमः

ॐ अमृतांशूद्भवाय नमः

ॐ भानवे नमः

ॐ शशबिन्दवे नमः

ॐ सुरेश्वराय नमः

ॐ औषधाय नमः

ॐ जगतस्सेतवे नमः

ॐ सत्यधर्मपराक्रमाय नमः

ॐ भूतभव्यभवन्नाथाय नमः

ॐ पवनाय नमः

ॐ पावनाय नमः

ॐ अनलाय नमः

ॐ कामघ्ने नमः

ॐ कामकृते नमः

ॐ कान्ताय नमः

ॐ कामाय नमः

ॐ कामप्रदाय नमः

ॐ प्रभवे नमः

ॐ युगादिकृते नमः ३००

ॐ युगावर्ताय नमः

ॐ नैकमायाय नमः

ॐ महाशनाय नमः

ॐ अदृश्याय नमः

ॐ व्यक्तरूपाय नमः

ॐ सहस्रजिते नमः

ॐ अनन्तजिते नमः

ॐ इष्टाय नमः

ॐ अविशिष्टाय नमः

ॐ शिष्टेष्टाय नमः

ॐ शिखण्डिने नमः

ॐ नहुषाय नमः

ॐ वृषाय नमः

ॐ क्रोधघ्ने नमः

ॐ क्रोधकृत्कर्त्रे नमः

ॐ विश्वबाहवे नमः

ॐ महीधराय नमः

ॐ अच्युताय नमः

ॐ प्रथिताय नमः

ॐ प्राणाय नमः

ॐ प्राणदाय नमः

ॐ वासवानुजाय नमः

ॐ अपां निधये नमः

ॐ अधिष्ठानाय नमः

ॐ अप्रमत्ताय नमः

ॐ प्रतिष्ठिताय नमः

ॐ स्कन्दाय नमः

ॐ स्कन्दधराय नमः

ॐ धुर्याय नमः

ॐ वरदाय नमः

ॐ वायुवाहनाय नमः

ॐ वासुदेवाय नमः

ॐ बृहद्भानवे नमः

ॐ आदिदेवाय नमः

ॐ पुरन्दराय नमः

ॐ अशोकाय नमः

ॐ तारणाय नमः

ॐ ताराय नमः

ॐ शूराय नमः

ॐ शौरये नमः

ॐ जनेश्वराय नमः

ॐ अनुकूलाय नमः

ॐ शतावर्ताय नमः

ॐ पद्मिने नमः

ॐ पद्मनिभेक्षणाय नमः

ॐ पद्मनाभाय नमः

ॐ अरविन्दाक्षाय नमः

ॐ पद्मगर्भाय नमः

ॐ शरीरभृते नमः

ॐ महदर्घये नमः

ॐ ऋद्घाय नमः

ॐ वृद्घात्मने नमः

ॐ महाक्षाय नमः

ॐ गरुडध्वजाय नमः

ॐ अतुलाय नमः

ॐ शरभाय नमः

ॐ भीमाय नमः

ॐ समयज्ञाय नमः

ॐ हविर्हरये नमः

ॐ सर्वलक्षणलक्षणाय नमः

ॐ लक्ष्मीवते नमः

ॐ समितिञ्जाय नमः

ॐ विक्षराय नमः

ॐ रोहिताय नमः

ॐ मार्गाय नमः

ॐ हेतवे नमः

ॐ दामोदराय नमः

ॐ सहाय नमः

ॐ महीधराय नमः

ॐ महाभागाय नमः

ॐ वेगवते नमः

ॐ अमिताशनाय नमः

ॐ उद्भवाय नमः

ॐ क्षोभणाय नमः

ॐ देवाय नमः

ॐ श्रीगर्भाय नमः

ॐ परमेश्वराय नमः

ॐ करणाय नमः

ॐ कारणाय नमः

ॐ कर्त्रे नमः

ॐ विकर्त्रे नमः

ॐ गहनाय नमः

ॐ गुहाय नमः

ॐ व्यवसायाय नमः

ॐ व्यवस्थानाय नमः

ॐ संस्थानाय नमः

ॐ स्थानदाय नमः

ॐ ध्रुवाय नमः

ॐ परर्धये नमः

ॐ परमस्पष्टाय नमः

ॐ तुष्टाय नमः

ॐ पुष्टाय नमः

ॐ शुभेक्षणाय नमः

ॐ रामाय नमः

ॐ विरामाय नमः

ॐ विरताय नमः

ॐ मार्गाय नमः

ॐ नेयाय नमः

ॐ नयाय नमः

ॐ अनयाय नमः ४००

ॐ वीराय नमः

ॐ शक्तिमतां श्रेष्ठाय नमः

ॐ धर्माय नमः

ॐ धर्मविदुत्तमाय नमः

ॐ वैकुण्ठाय नमः

ॐ पुरुषाय नमः

ॐ प्राणाय नमः

ॐ प्राणदाय नमः

ॐ प्रणवाय नमः

ॐ पृथवे नमः

ॐ हिरण्यगर्भाय नमः

ॐ शत्रुघ्नाय नमः

ॐ व्याप्ताय नमः

ॐ वायवे नमः

ॐ अधोक्षजाय नमः

ॐ ऋतवे नमः

ॐ सुदर्शनाय नमः

ॐ कालाय नमः

ॐ परमेष्ठिने नमः

ॐ परिग्रहाय नमः

ॐ उग्राय नमः

ॐ संवत्सराय नमः

ॐ दक्षाय नमः

ॐ विश्रामाय नमः

ॐ विश्वदक्षिणाय नमः

ॐ विस्ताराय नमः

ॐ स्थावरस्थाणवे नमः

ॐ प्रमाणाय नमः

ॐ बीजायाव्ययाय नमः

ॐ अर्थाय नमः

ॐ अनर्थाय नमः

ॐ महाकोशाय नमः

ॐ महाभोगाय नमः

ॐ महाधनाय नमः

ॐ अनिर्विण्णाय नमः

ॐ स्थविष्ठाय नमः

ॐ अभुवे नमः

ॐ धर्मयूपाय नमः

ॐ महामखाय नमः

ॐ नक्षत्रनेमये नमः

ॐ नक्षत्रिणे नमः

ॐ क्षमाय नमः

ॐ क्षामाय नमः

ॐ समीहनाय नमः

ॐ यज्ञाय नमः

ॐ इज्याय नमः

ॐ महेज्याय नमः

ॐ क्रतवे नमः

ॐ सत्राय नमः

ॐ सतां गतये नमः

ॐ सर्वदर्शिने नमः

ॐ विमुक्तात्मने नमः

ॐ सर्वज्ञाय नमः

ॐ ज्ञानायोत्तमाय नमः

ॐ सुव्रताय नमः

ॐ सुमुखाय नमः

ॐ सूक्ष्माय नमः

ॐ सुघोषाय नमः

ॐ सुखदाय नमः

ॐ सुहृदे नमः

ॐ मनोहराय नमः

ॐ जितक्रोधाय नमः

ॐ वीरबाहवे नमः

ॐ विदारणाय नमः

ॐ स्वापनाय नमः

ॐ स्ववशाय नमः

ॐ व्यापिने नमः

ॐ नैकात्मने नमः

ॐ नैककर्मकृते नमः

ॐ वत्सराय नमः

ॐ वत्सलाय नमः

ॐ वत्सिने नमः

ॐ रत्नगर्भाय नमः

ॐ धनेश्वराय नमः

ॐ धर्मगुपे नमः

ॐ धर्मकृते नमः

ॐ धर्मिणे नमः

ॐ सते नमः

ॐ असते नमः

ॐ क्षराय नमः

ॐ अक्षराय नमः

ॐ अविज्ञात्रे नमः

ॐ सहस्रांशवे नमः

ॐ विधात्रे नमः

ॐ कृतलक्षणाय नमः

ॐ गभस्तिनेमये नमः

ॐ सत्वस्थाय नमः

ॐ सिंहाय नमः

ॐ भूतमहेश्वराय नमः

ॐ आदिदेवाय नमः

ॐ महादेवाय नमः

ॐ देवेशाय नमः

ॐ देवभृद्गुरवे नमः

ॐ उत्तराय नमः

ॐ गोपतये नमः

ॐ गोप्त्रे नमः

ॐ ज्ञानगम्याय नमः

ॐ पुरातनाय नमः

ॐ शरीरभूभृते नमः

ॐ भोक्त्रे नमः

ॐ कपीन्द्राय नमः

ॐ भूरिदक्षिणाय नमः

ॐ सोमपाय नमः

ॐ अमृतपाय नमः

ॐ सोमाय नमः

ॐ पुरुजिते नमः

ॐ पुरुसत्तमाय नमः

ॐ विनयाय नमः

ॐ जयाय नमः

ॐ सत्यसन्धाय नमः

ॐ दाशार्हाय नमः

ॐ सात्वतां पतये नमः

ॐ जीवाय नमः

ॐ विनयितासाक्षिणे नमः

ॐ मुकुन्दाय नमः

ॐ अमितविक्रमाय नमः

ॐ अम्भोनिधये नमः

ॐ अनन्तात्मने नमः

ॐ महोदधिशयाय नमः

ॐ अन्तकाय नमः

ॐ अजाय नमः

ॐ महार्हाय नमः

ॐ स्वाभाव्याय नमः
ॐ जितामित्राय नमः
ॐ प्रमोदनाय नमः
ॐ आनन्दाय नमः
ॐ नन्दनाय नमः
ॐ नन्दाय नमः
ॐ सत्यधर्मणे नमः
ॐ त्रिविक्रमाय नमः
ॐ महर्षये कपिलाचार्याय नमः
ॐ कृतज्ञाय नमः
ॐ मेदिनीपतये नमः
ॐ त्रिपदाय नमः
ॐ त्रिदशाध्यक्षाय नमः
ॐ महाशृङ्गाय नमः
ॐ कृतान्तकृते नमः
ॐ महावराहाय नमः
ॐ गोविन्दाय नमः
ॐ सुषेणाय नमः
ॐ कनकाङ्गदिने नमः
ॐ गुह्याय नमः
ॐ गभीराय नमः
ॐ गहनाय नमः
ॐ गुप्ताय नमः
ॐ चक्रगदाधराय नमः

ॐ वेधसे नमः

ॐ स्वाङ्गाय नमः

ॐ अजिताय नमः

ॐ कृष्णाय नमः

ॐ दृढाय नमः

ॐ सङ्कर्षणायाच्युताय नमः

ॐ वरुणाय नमः

ॐ वारुणाय नमः

ॐ वृक्षाय नमः

ॐ पुष्कराक्षाय नमः

ॐ महामनसे नमः

ॐ भगवते नमः

ॐ भगघ्ने नमः

ॐ आनन्दिने नमः

ॐ वनमालिने नमः

ॐ हलायुधाय नमः

ॐ आदित्याय नमः

ॐ ज्योतिरादित्याय नमः

ॐ सहिष्णवे नमः

ॐ गतिसत्तमाय नमः

ॐ सुधन्वने नमः

ॐ खण्डपरशवे नमः

ॐ दारुणाय नमः

ॐ द्रविणप्रदाय नमः

ॐ दिविस्पृशे नमः

ॐ सर्वदृग्व्यासाय नमः

ॐ वाचस्पतयेऽयोनिजाय नमः

ॐ त्रिसाम्ने नमः

ॐ सामगाय नमः

ॐ साम्ने नमः

ॐ निर्वाणाय नमः

ॐ भेषजाय नमः

ॐ भिषजे नमः

ॐ सन्न्यासकृते नमः

ॐ शमाय नमः

ॐ शान्ताय नमः

ॐ निष्ठायै नमः

ॐ शान्त्यै नमः

ॐ परायणाय नमः

ॐ शुभाङ्गाय नमः

ॐ शान्तिदाय नमः

ॐ स्त्रष्ट्रे नमः

ॐ कुमुदाय नमः

ॐ कुवलेशयाय नमः

ॐ गोहिताय नमः

ॐ गोपतये नमः

ॐ गोप्त्रे नमः

ॐ वृषभाक्षाय नमः

ॐ वृषप्रियाय नमः
ॐ अनिवर्तिने नमः
ॐ निवृत्तात्मने नमः
ॐ सङ्क्षेप्त्रे नमः
ॐ क्षेमकृते नमः
ॐ शिवाय नमः ६००
ॐ श्रीवत्सवक्षसे नमः .
ॐ श्रीवासाय नमः
ॐ श्रीपतये नमः
ॐ श्रीमतां वराय नमः
ॐ श्रीदाय नमः
ॐ श्रीशाय नमः
ॐ श्रीनिवासाय नमः
ॐ श्रीनिधये नमः
ॐ श्रीविभावनाय नमः
ॐ श्रीधराय नमः
ॐ श्रीकराय नमः
ॐ श्रेयसे नमः
ॐ श्रीमते नमः
ॐ लोकत्रयाश्रयाय नमः
ॐ स्वक्षाय नमः
ॐ स्वङ्गाय नमः
ॐ शतानन्दाय नमः
ॐ नन्दये नमः

ॐ ज्योतिर्गणेश्वराय नमः

ॐ विजितात्मने नमः

ॐ अविधेयात्मने नमः

ॐ सत्कीर्तये नमः

ॐ छिन्नसंशयाय नमः

ॐ उदीर्णाय नमः

ॐ सर्वतश्चक्षुषे नमः

ॐ अनीशाय नमः

ॐ शाश्वतस्थिराय नमः

ॐ भूशयाय नमः

ॐ भूषणाय नमः

ॐ भूतये नमः

ॐ विशोकाय नमः

ॐ शोकनाशनाय नमः

ॐ अर्चिष्मते नमः

ॐ अर्चिताय नमः

ॐ कुम्भाय नमः

ॐ विशुद्धात्मने नमः

ॐ विशोधनाय नमः

ॐ अनिरुद्धाय नमः

ॐ अप्रतिरथाय नमः

ॐ प्रद्युम्नाय नमः

ॐ अमितविक्रमाय नमः

ॐ कालनेमिनिघ्ने नमः

ॐ वीराय नमः

ॐ शौरये नमः

ॐ शूरजनेश्वराय नमः

ॐ त्रिलोकात्मने नमः

ॐ त्रिलोकेशाय नमः

ॐ केशवाय नमः

ॐ केशिघ्ने नमः

ॐ हरये नमः

ॐ कामदेवाय नमः

ॐ कामपालाय नमः

ॐ कामिने नमः

ॐ कान्ताय नमः

ॐ कृतागमाय नमः

ॐ अनिर्देश्यवपुषे नमः

ॐ विष्णवे नमः

ॐ वीराय नमः

ॐ अनन्ताय नमः

ॐ धनञ्जयाय नमः

ॐ ब्रह्मण्याय नमः

ॐ ब्रह्मकृते नमः

ॐ ब्रह्मणे नमः

ॐ ब्रह्मणे नमः

ॐ ब्रह्मविवर्धनाय नमः

ॐ ब्रह्मविदे नमः

ॐ ब्राह्मणाय नमः

ॐ ब्रह्मिणे नमः

ॐ ब्रह्मज्ञाय नमः

ॐ ब्राह्मणप्रियाय नमः

ॐ महाक्रमाय नमः

ॐ महाकर्मिणे नमः

ॐ महातेजसे नमः

ॐ महोरगाय नमः

ॐ महाक्रतवे नमः

ॐ महायज्वने नमः

ॐ महायज्ञाय नमः

ॐ महाहविषे नमः

ॐ स्तव्याय नमः

ॐ स्तवप्रियाय नमः

ॐ स्तोत्राय नमः

ॐ स्तुतये नमः

ॐ स्तोत्रे नमः

ॐ रणप्रियाय नमः

ॐ पूर्णाय नमः

ॐ पूरयित्रे नमः

ॐ पुण्याय नमः

ॐ पुण्यकीर्तये नमः

ॐ अनामयाय नमः

ॐ मनोजवाय नमः

ॐ तीर्थकराय नमः

ॐ वसुरेतसे नमः

ॐ वसुप्रदाय नमः

ॐ वसुप्रदाय नमः

ॐ वासुदेवाय नमः

ॐ वसवे नमः

ॐ वसुमनसे नमः

ॐ हविषे नमः

ॐ सद्‌गतये नमः

ॐ सत्कृतये नमः ७००

ॐ सत्तायै नमः

ॐ सद्‌भूतये नमः

ॐ सत्परायणाय नमः

ॐ शूरसेनाय नमः

ॐ यदुश्रेष्ठाय नमः

ॐ सन्निवासाय नमः

ॐ सुयामुनाय नमः

ॐ भूतावासाय नमः

ॐ वासुदेवाय नमः

ॐ सर्वासुनिलयाय नमः

ॐ अनलाय नमः

ॐ दर्पघ्ने नमः

ॐ दर्पदाय नमः

ॐ दृप्ताय नमः

ॐ दुर्धराय नमः
ॐ अपराजिताय नमः
ॐ विश्वमूर्तये नमः
ॐ महामूर्तये नमः
ॐ दीप्तमूर्तये नमः
ॐ अमूर्तिमते नमः
ॐ अनेकमूर्तये नमः
ॐ अव्यक्ताय नमः
ॐ शतमूर्तये नमः
ॐ शताननाय नमः
ॐ एकस्मै नमः
ॐ नैकस्मै नमः
ॐ सवाय नमः
ॐ काय नमः
ॐ कस्मै नमः
ॐ यस्मै नमः
ॐ तस्मै नमः
ॐ पदायानुत्तमाय नमः
ॐ लोकबन्धवे नमः
ॐ लोकनाथाय नमः
ॐ माधवाय नमः
ॐ भक्तवत्सलाय नमः
ॐ सुवर्णवर्णाय नमः
ॐ हेमाङ्गाय नमः

ॐ वराङ्गाय नमः

ॐ चन्दनाङ्गदिने नमः

ॐ वीरघ्ने नमः

ॐ विषमाय नमः

ॐ शून्याय नमः

ॐ घृताशिषे नमः

ॐ अचलाय नमः

ॐ चलाय नमः

ॐ अमानिने नमः

ॐ मानदाय नमः

ॐ मान्याय नमः

ॐ लोकस्वामिने नमः

ॐ त्रिलोकधृते नमः

ॐ सुमेधसे नमः

ॐ मेधजाय नमः

ॐ धन्याय नमः

ॐ सत्यमेधसे नमः

ॐ धराधराय नमः

ॐ तेजोवृषाय नमः

ॐ द्युतिधराय नमः

ॐ सर्वशस्त्रभृतां वराय नमः

ॐ प्रग्रहाय नमः

ॐ निग्रहाय नमः

ॐ व्यग्राय नमः

ॐ नैकशृङ्गाय नमः

ॐ गदाग्रजाय नमः

ॐ चतुर्मूर्तये नमः

ॐ चतुर्बाहवे नमः

ॐ चतुर्व्यूहाय नमः

ॐ चतुर्गतये नमः

ॐ चतुरात्मने नमः

ॐ चतुर्भावाय नमः

ॐ चतुर्वेदविदे नमः

ॐ एकपदे नमः

ॐ समावर्ताय नमः

ॐ अनिवृत्तात्मने नमः

ॐ दुर्जयाय नमः

ॐ दुरतिक्रमाय नमः

ॐ दुर्लभाय नमः

ॐ दुर्गमाय नमः

ॐ दुर्गाय नमः

ॐ दुरावासाय नमः

ॐ दुरारिघ्ने नमः

ॐ शुभाङ्गाय नमः

ॐ लोकसारङ्गाय नमः

ॐ सुतन्तवे नमः

ॐ तन्तुवर्धनाय नमः

ॐ इन्द्रकर्मणे नमः

ॐ महाकर्मणे नमः

ॐ कृतकर्मणे नमः

ॐ कृतागमाय नमः

ॐ उद्भवाय नमः

ॐ सुन्दराय नमः

ॐ सुन्दाय नमः

ॐ रत्ननाभाय नमः

ॐ सुलोचनाय नमः

ॐ अर्काय नमः

ॐ वाजसनाय नमः

ॐ शृङ्गिणे नमः

ॐ जयन्ताय नमः

ॐ सर्वविज्जयिने नमः

ॐ सुवर्णबिन्दवे नमः ८००

ॐ अक्षोभ्याय नमः

ॐ सर्ववागीश्वरेश्वराय नमः

ॐ महाह्रदाय नमः

ॐ महागर्ताय नमः

ॐ महाभूताय नमः

ॐ महानिधये नमः

ॐ कुमुदाय नमः

ॐ कुन्दराय नमः

ॐ कुन्दाय नमः

ॐ पर्जन्याय नमः

ॐ पावनाय नमः

ॐ अनिलाय नमः

ॐ अमृताशाय नमः

ॐ अमृतवपुषे नमः

ॐ सर्वज्ञाय नमः

ॐ सर्वतोमुखाय नमः

ॐ सुलभाय नमः

ॐ सुव्रताय नमः

ॐ सिद्धाय नमः

ॐ शत्रुजिते नमः

ॐ शत्रुतापनाय नमः

ॐ न्यग्रोधाय नमः

ॐ उदुम्बराय नमः

ॐ अश्वत्थाय नमः

ॐ चाणूरान्ध्रनिषूदनाय नमः

ॐ सहस्रार्चिषे नमः

ॐ सप्तजिह्वाय नमः

ॐ सप्तैधसे नमः

ॐ सप्तवाहनाय नमः

ॐ अमूर्तये नमः

ॐ अनघाय नमः

ॐ अचिन्त्याय नमः

ॐ भयकृते नमः

ॐ भयनाशनाय नमः

ॐ अणवे नमः

ॐ बृहते नमः

ॐ कृशाय नमः

ॐ स्थूलाय नमः

ॐ गुणभृते नमः

ॐ निर्गुणाय नमः

ॐ महते नमः

ॐ अधृताय नमः

ॐ स्वधृताय नमः

ॐ प्राग्वंशाय नमः

ॐ वंशवर्धनाय नमः

ॐ भारभृते नमः

ॐ कथिताय नमः

ॐ योगिने नमः

ॐ योगीशाय नमः

ॐ सर्वकामदाय नमः

ॐ आश्रमाय नमः

ॐ श्रमणाय नमः

ॐ क्षमाय नमः

ॐ सुपर्णाय नमः

ॐ वायुवाहनाय नमः

ॐ धनुर्धराय नमः

ॐ धनुर्वेदाय नमः

ॐ दण्डाय नमः

ॐ दमयित्रे नमः

ॐ दमाय नमः

ॐ अपराजिताय नमः

ॐ सर्वसहाय नमः

ॐ नियन्त्रे नमः

ॐ अनियमाय नमः

ॐ अयमाय नमः

ॐ सत्त्ववते नमः

ॐ सात्त्विकाय नमः

ॐ सत्याय नमः

ॐ सत्यधर्मपरायणाय नमः

ॐ अभिप्रायाय नमः

ॐ प्रियार्हाय नमः

ॐ अर्हाय नमः

ॐ प्रियकृते नमः

ॐ प्रीतिवर्धनाय नमः

ॐ विहायसगतये नमः

ॐ ज्योतिषे नमः

ॐ सुरुचये नमः

ॐ हुतभुजे नमः

ॐ विभवे नमः

ॐ रवये नमः

ॐ विरोचनाय नमः

ॐ सूर्याय नमः

ॐ सवित्रे नमः

ॐ रविलोचनाय नमः

ॐ अनन्ताय नमः

ॐ हुतभुजे नमः

ॐ भोक्त्रे नमः

ॐ सुखदाय नमः

ॐ नैकजाय नमः

ॐ अग्रजाय नमः

ॐ अनिर्विण्णाय नमः

ॐ सदामर्षिणे नमः

ॐ लोकाधिष्ठानाय नमः

ॐ अद्भुताय नमः

ॐ सनाते नमः

ॐ सनातनतमाय नमः

ॐ कपिलाय नमः

ॐ कपये नमः

ॐ अप्ययाय नमः ९००

ॐ स्वस्तिदाय नमः

ॐ स्वस्तिकृते नमः

ॐ स्वस्तये नमः

ॐ स्वस्तिभुजे नमः

ॐ स्वस्तिदक्षिणाय नमः

ॐ अरौद्राय नमः

ॐ कुण्डलिने नमः

ॐ चक्रिणे नमः

ॐ विक्रमिणे नमः

ॐ ऊर्जितशासनाय नमः

ॐ शब्दातिगाय नमः

ॐ शब्दसहाय नमः

ॐ शिशिराय नमः

ॐ शर्वरीकराय नमः

ॐ अक्रूराय नमः

ॐ पेशलाय नमः

ॐ दक्षाय नमः

ॐ दक्षिणाय नमः

ॐ क्षमिणां वराय नमः

ॐ विद्वत्तमाय नमः

ॐ वीतभयाय नमः

ॐ पुण्यश्रवणकीर्तनाय नमः

ॐ उत्तारणाय नमः

ॐ दुष्कृतिघ्ने नमः

ॐ पुण्याय नमः

ॐ दुःस्वप्ननाशनाय नमः

ॐ वीरघ्ने नमः

ॐ रक्षणाय नमः

ॐ सन्ताय नमः

ॐ जीवनाय नमः

ॐ पर्यवस्थिताय नमः

ॐ अनन्तरूपाय नमः

ॐ अनन्तश्रिये नमः

ॐ जितमन्यवे नमः

ॐ भयापहाय नमः

ॐ चतुरश्राय नमः

ॐ गभीरात्मने नमः

ॐ विदिशाय नमः

ॐ व्यादिशाय नमः

ॐ दिशाय नमः

ॐ अनादये नमः

ॐ भुवो भुवे नमः

ॐ लक्ष्म्यै नमः

ॐ सुवीराय नमः

ॐ रुचिराङ्गदाय नमः

ॐ जननाय नमः

ॐ जनजन्मादये नमः

ॐ भीमाय नमः

ॐ भीमपराक्रमाय नमः

ॐ आधारनिलयाय नमः

ॐ अधात्रे नमः

ॐ पुष्पहासाय नमः

ॐ प्रजागराय नमः

ॐ ऊर्ध्वगाय नमः

ॐ सत्पथाचाराय नमः

ॐ प्राणदाय नमः

ॐ प्रणवाय नमः

ॐ पणाय नमः

ॐ प्रमाणाय नमः

ॐ प्राणनिलयाय नमः

ॐ प्राणभृते नमः

ॐ प्राणजीवनाय नमः

ॐ तत्त्वाय नमः

ॐ तत्त्वविदे नमः

ॐ एकात्मने नमः

ॐ जन्ममृत्युजरातिगाय नमः

ॐ भूर्भुवःस्वस्तरवे नमः

ॐ ताराय नमः

ॐ सवित्रे नमः

ॐ प्रपितामहाय नमः

ॐ यज्ञाय नमः

ॐ यज्ञपतये नमः

ॐ यज्वने नमः

ॐ यज्ञाङ्गाय नमः

ॐ यज्ञवाहनाय नमः

ॐ यज्ञभृते नमः

ॐ यज्ञकृते नमः

ॐ यज्ञिने नमः

ॐ यज्ञभुजे नमः

ॐ यज्ञसाधनाय नमः

ॐ यज्ञान्तकृते नमः

ॐ यज्ञगुह्याय नमः

ॐ अन्नाय नमः

ॐ अन्नादाय नमः

ॐ आत्मयोनये नमः

ॐ स्वयञ्जाताय नमः

ॐ वैखानाय नमः

ॐ सामगायनाय नमः

ॐ देवकीनन्दनाय नमः

ॐ स्रष्ट्रे नमः

ॐ क्षितीशाय नमः

ॐ पापनाशनाय नमः

ॐ शङ्खभृते नमः

ॐ नन्दकिने नमः

ॐ चक्रिणे नमः

ॐ शाङ्र्गधन्वने नमः

ॐ गदाधराय नमः

ॐ रथाङ्गपाणये नमः

ॐ अक्षोभ्याय नमः

ॐ सर्वप्रहरणायुधाय नमः

सहस्रनामपूजां समर्पयामि ।

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।

सहस्त्रनाम्ने पुरुषाय शाश्वते सहस्त्रकोटियुगधारिणे नमः ।।
सकलाराधनैः स्वर्चितमस्तु ।।

धूपः

ॐ यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते ।।
(ॐ कर्दमेन प्रजा भूता मयि सम्भव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ।।)
ॐ वनस्पतिरसोत्पन्नो गन्धाढ्यो धूप उत्तमः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ।।
श्रीसत्यनारायणाय नमः धूपं समर्पयामि ।। ११ ।।

दीपः

ॐ ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः । पद्भ्यागुँ शूद्रो अजायत ।।
(ॐ आपः स्त्रजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरगुँ श्रियं वासय मे कुले ।।)
साज्यं त्रिवर्तिसंयुक्तं वह्निना योजितं मया ।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापह ।।
श्रीसत्यनारायणाय नमः दीपं समर्पयामि ।। १२ ।।

सपादभक्ष्यनैवेद्यम्

(देवस्य पुरतश्चतुरश्रमण्डले सपादभक्ष्यनैवेद्यं निधाय गायत्र्या प्रोक्ष्य)

ॐ चन्द्रमा मनसो जातः । चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च । प्राणाद् वायुरजायत ।।
(ॐ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रागुँ हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।।)
घृत - गोधूमक - क्षीर - रम्भाफल - सितान्वितम् ।
सपादभक्ष्यं नैवेद्यमुत्तमं प्रतिगृह्यताम् ।।
(सशक्तिसाङ्गसायुधसवाहनसपरिवार) श्रीसत्यनारायणाय नमः । नैवेद्यार्थे सपादभक्ष्यनैवेद्यं समर्पयामि ।। १३ ।।

ॐ अमृतोपस्तरणमसि स्वाहा ।
ॐ प्राणाय स्वाहा ।
ॐ अपानाय स्वाहा ।
ॐ व्यानाय स्वाहा ।
ॐ उदानाय स्वाहा ।
ॐ समानाय स्वाहा ।
श्रीसत्यनारायणाय नमः । मध्ये पानीयं समर्पयामि ।
समर्पितनैवेद्यं विसर्जयामि ।
उत्तरापोशनं समर्पयामि ।
हस्तप्रक्षाळनं समर्पयामि ।
मुखप्रक्षाळनं समर्पयामि ।
करोद्वर्तनार्थे चन्दनं समर्पयामि ।
शुद्धाचमनं समर्पयामि ।

फलसमर्पणम्

नाळिकेरं मातुलिङ्गं जम्बूकर्कटिदाडिमम् ।

कूष्माण्डं बदरं रम्भाफलं च प्रतिगृह्यताम् ।।

इदं फलं मया देव स्थापितं पुरतस्तव ।

तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ।।

श्रीसत्यनारायणाय नमः । फलाष्टकं समर्पयामि ।

ताम्बूलम्

पूगीफलं महद्दिव्यं नागवल्लीदळैर्युतम् ।

कर्पूरैलादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ।।

श्रीसत्यनारायणाय नमः । ताम्बूलं समर्पयामि ।।

दक्षिणा

न्यूनातिरिक्तपूजायाः सम्पूर्णफलहेतवे।

दक्षिणां काञ्चनीं देव स्थापयामि तवाग्रतः ।।

श्रीसत्यनारायणाय नमः । पूजासम्पूर्णार्थे सुवर्णपुष्पदक्षिणां समर्पयामि।।

नीराजनम्

ॐ विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात् ।

सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी जनयन् देव एकः।।

त्वद्भासा भासितो लोकः कोटिसूर्यसमप्रभ ।

नीराजयिष्ये त्वां विष्णो कृपां कुरु मम प्रभो ।।

श्रीसत्यनारायणाय नमः । नीराजनं समर्पयामि ।।

नीराजनं सुमङ्गल्यं कर्पूरोद्भासितं विभो ।
चन्द्रार्कवह्निसदृशं देवेश प्रतिगृह्यताम् ।।
श्रीसत्यनारायणाय नमः । कर्पूरनीराजनं समर्पयामि ।।

राजोपचाराः

गृहाण पादुके दिव्ये सरत्ने छत्रचामरे ।
दर्पणं व्यजनं दोलां राजभोगाय कल्पितम् ।।
श्रीसत्यनारायणाय नमः । राजोपचारान् समर्पयामि ।।

प्रदक्षिणम्

ॐ नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकागुँ अकल्पयन् ।।
(ॐ आर्द्रां यः करिणीं यष्टिं सुवर्णागूँ हेममालिनीम् ।
सूर्यागुँ हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।।)
मया कायेन मनसा वाचा जन्मशतार्जितम् ।
पापं प्रशमय श्रीश प्रदक्षिणपदे पदे ।।
श्रीसत्यनारायणाय नमः । प्रदक्षिणां समर्पयामि ।। १४ ।।

नमस्कारः

ॐ सप्तास्यासन् परिधयः । त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः । अबध्नन् पुरुषं पशुम् ।।
(तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यागुँ हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ।।)
नमः सर्वहितार्थाय जगदाधारहेतवे ।

साष्टाङ्गोऽयं प्रणामस्ते प्रयत्नेन मया कृतः ।।
श्रीसत्यनारायणाय नमः । नमस्कारान् समर्पयामि ।। १५ ।।

मन्त्रपुष्पम्

ॐ यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्ते । यत्र पूर्वे साध्याः सन्ति देवाः ।।

(ॐ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चञ्च श्रीकामः सततं जपेत्।।)
मन्त्रपुष्पाञ्जलिं पूजान्यूनात्वाधिक्यपूरणम् ।
ददामि देवदेवेश मन्त्रोच्चारणपूर्वकम् ।।
श्रीसत्यनारायणाय नमः । मन्त्रपुष्पाञ्जलिं समर्पयामि ।।

प्रार्थना

प्रार्थनं करिष्ये -
यन्मया भक्तियुक्तेन पत्रं पुष्पं फलं जलम् ।
निवेदितं च नैवेद्यं तद्गृहाणानुकम्पया ।। १ ।।
अमोघं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम् ।
हृषीकेशं जगन्नाथं वागीशं वरदायकम् ।। २ ।।
गुणत्रयं गुणातीतं गोविन्दं गरुडध्वजम् ।
जनार्दनं जनातीतं जानकीवल्लभं हरिम् ।। ३ ।।
प्रणमामि सदा भक्त्या नारायणमतः परम् ।
दुर्गमे विषमे घोरे शत्रुभिः परिपीडिते ।। ४ ।।
निस्तारयस्व सर्वेषु तथानिष्टभयेषु च ।
नामान्येतानि सङ्कीर्त्य फलमीप्सितमाप्नुयात् ।। ५ ।।

सत्यनारायणं देवं वन्देऽहं कामदं प्रभुम् ।
लीलया विततं विश्वं येन तस्मै नमो नमः ।। ६ ।।
गतं पापं गतं दुःखं गतं दारिद्र्यमेव च ।
आगता सुखसम्पत्तिः पुण्याच्च तव दर्शनात् ।। ७ ।।
पूजितस्त्वं यथाशक्त्या नमस्तेऽस्तु सुरोत्तम ।
ऐहिकामुष्मिकीं देव कार्यसिद्धिं दिशस्व मे ।। ८ ।।
श्रीसत्यनारायणाय नमः प्रार्थनां समर्पयामि ।।

यस्य स्मृत्या च नामोक्त्या तपःपूजाक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ।।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे ।।

अस्मिन् वर्तमानकालनामव्यावहारिके ... संवत्सरस्य ... अयने ... ऋतौ ... मासे ... पक्षे ... तिथौ ... वासरे ... (प्रदोष) काले अनेन मया कृतपूजाराधनेन श्रीसत्यनारायणः प्रीयताम् ।।

पूजामध्ये स्वरवर्णमन्त्रतन्त्रन्यूनातिरिक्तलोपदोषप्रायश्चित्तार्थं नामत्रयजपं अहं करिष्ये ।।

ॐ अच्युताय नमः । ॐ अनन्ताय नमः । ॐ गोविन्दाय नमः ।।
ॐ अच्युताय नमः । ॐ अनन्ताय नमः । ॐ गोविन्दाय नमः ।।
ॐ अच्युताय नमः । ॐ अनन्ताय नमः । ॐ गोविन्दाय नमः ।।
ॐ विष्णवे नमः । ॐ विष्णवे नमः । ॐ विष्णवे नमः ।।

कथाश्रवणविधिः

अद्य पूर्वोच्चरितशुभपुण्यतिथौ मम श्रीसत्यनारायणप्रीत्यर्थं श्रीसत्यनारायणकथाश्रवणं कर्तुं आदौ पुस्तकपूजनं वाचकपूजनं च करिष्ये । इति सङ्कल्प्य गन्धपुष्पाक्षतादिभिः पुस्तकपूजां वाचकपूजां च कृत्वा विप्रमित्रादिजनैः सहैकाग्रचित्तः कथाश्रवणं कुर्यात् ।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः साक्षान्महेश्वरः ।
गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः ।।
गुरुं गणपतिं दुर्गां भास्करं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ।।

स्कन्दपुराणे रेवाखण्डे श्रीसत्यनारायणव्रतकथा

प्रथमोऽध्यायः

व्यास उवाच

एकदा नैमिषारण्ये ऋषयः शौनकादयः ।
पप्रच्छुर्मुनयः सर्वे सूतं पौराणिकं खलु ।। १ ।।
व्रतेन तपसा किं वा प्राप्यते वाञ्छितं फलम् ।
तत्सर्वं श्रोतुमिच्छामः कथयस्व महामुने ।। २ ।।

सूत उवाच -

नारदेनैव सम्पृष्टो भगवान् कमलापतिः ।

सुरर्षये यथैवाह तच्छृणुध्वं समाहिताः ।। ३ ।।
एकदा नारदो योगी परानुग्रहकाङ्क्षया ।
पर्यटन् विविधान् लोकान् मर्त्यलोकमुपागतः ।। ४ ।।
तत्र दृष्ट्वा जनान् सर्वान् नानाक्लेशसमन्वितान् ।
नानायोनिसमुत्पन्नान् क्लिश्यमानान् स्वकर्मभिः ।। ५ ।।
केनोपायेन चैतेषां दुःखनाशो भवेद्ध्रुवम् ।
इति सञ्चित्य मनसा विष्णुलोकं गतस्तदा ।। ६ ।।
तत्र नारायणं देवं शुक्लवर्णं चतुर्भुजम् ।
शङ्खचक्रगदापद्मवनमालाविभूषितम् ।। ७ ।।
दृष्ट्वा तं देवदेवेशं स्तोतुं समुपचक्रमे ।

नारद उवाच -

नमो वाङ्मनसातीतरूपायानन्तशक्तये ।। ८ ।।
आदिमध्यान्तहीनाय निर्गुणाय गुणात्मने ।
सर्वेषामादिभूताय भक्तानामार्तिनाशिने ।। ९ ।।
श्रुत्वा स्तोत्रं ततो विष्णुर्नारदं प्रत्यभाषत ।।

श्रीभगवान् उवाच -

किमर्थमागतोऽसि त्वं किं ते मनसि वर्तते ।। १० ।।
कथयस्व महाभाग तत्सर्वं कथयामि ते ।

नारद उवाच -

मर्त्यलोके जनाः सर्वे नानाक्लेशसमन्विताः ।
नानायोनिसमुत्पन्नाः पच्यन्ते पापकर्मभिः ।। ११ ।।

तत्कथं शमयेन्नाथ लघूपायेन तद्वद ।
श्रोतुमिच्छामि तत्सर्वं कृपास्ति यदि ते मयि ।। १२ ।।

श्रीभगवान् उवाच -

साधु पृष्टं त्वया वत्स लोकानुग्रहकाङ्क्षया ।
यत्कृत्वा मुच्यते मोहात् तच्छ्रुणुध्वं वदामि ते ।। १३ ।।
व्रतमस्ति महत्पुण्यं स्वर्गे मर्त्ये च दुर्लभम् ।
तव स्नेहान्मया वत्स प्रकाशः क्रियतेऽधुना ।। १४ ।।
सत्यनारायणस्यैवं व्रतं सम्यग्विधानतः ।
कृत्वा सद्यः सुखं भुङ्क्त्वा चान्ते मोक्षमवाप्नुयात् ।। १५ ।।
तच्छ्रुत्वा भगवद्वाक्यं नारदो मुनिरब्रवीत् ।

नारद उवाच -

किं फलं किं विधानं च कृतं केनैव तद्व्रतम् ।। १६ ।।
तत्सर्वं विस्तराद्ब्रूहि कदा कार्यं हि तद्व्रतम् ।

श्रीभगवान् उवाच -

दुःखशोकादिशमनं धनधान्यप्रवर्धनम् ।। १७ ।।
सौभाग्यसन्ततिकरं सर्वत्र विजयप्रदम् ।
यस्मिन् कस्मिन् दिने मर्त्यो भक्तिश्रद्घासमन्वितः।। १९ ।।
सत्यनारायणं देवं यजेच्चैव निशामुखे ।
ब्राह्मणैर्बान्धवैश्चैव सहितो धर्मतत्परः ।। २० ।।
नैवेद्यं भक्तितो दद्यात् सपादं भक्ष्यमुत्तमम् ।
रम्भाफलं घृतं क्षीरं गोधूमस्य च चूर्णकम् ।।

अभावे शालिचूर्णं वा शर्करां वा गुडं तथा ।
सपादं सर्वभक्ष्याणि चैकीकृत्य निवेदयेत् ।। २१ ।।
विप्राय दक्षिणां दद्यात् कथां श्रुत्वा जनैः सह ।
ततश्च बन्धुभिः सार्धं विप्रांश्च प्रतिभोजयेत् ।। २२ ।।
सपादं भक्षयेद् भक्त्या नृत्यगीतादिकं चरेत् ।
ततश्च स्वगृहं गच्छेत् सत्यनारायणं स्मरन् ।। २३ ।।
एवं कृते मनुष्याणां वाञ्छासिद्धिर्भवेद्ध्रुवम् ।
विशेषतः कलियुगे लघूपायोऽस्ति भूतले ।। २४ ।।
श्रीस्कन्दपुराणे
रेवाखण्डे सत्यनारायणकथायां प्रथमः ।। १ ।।

द्वितीयोऽध्यायः

सूत उवाच -

अथान्यत् सम्प्रवक्ष्यामि कृतं येन पुरा द्विज ।
कश्चित् काशीपुरे रम्ये ह्यासिद् विप्रोऽतिनिर्धनः ।। १ ।।
क्षुत्तृड्भ्यां व्याकुलो भूत्वा नित्यं बभ्राम भूतले ।
दुःखितं ब्राह्मणं दृष्ट्वा भगवान् ब्राह्मणप्रियः ।। २ ।।
वृद्धब्राह्मणरूपस्तं पप्रच्छ द्विजमादरात् ।
किमर्थं भ्रमसे विप्र महीं नित्यं सुदुःखितः ।। ३ ।।
तत्सर्वं श्रोतुमिच्छामि कथ्यतां द्विजसत्तम ।

ब्राह्मण उवाच -

ब्राह्मणोऽतिदरिद्रोऽहं भिक्षार्थं वै भ्रमे महीम् ।। ४ ।।
उपायं यदि जानासि कृपया कथय प्रभो ।

वृद्घब्राह्मण उवाच -

सत्यनारायणो विष्णुर्वांछितार्थफलप्रदः ।। ५ ।।
सद्यस्त्वं पूजनं विप्र कुरुष्व व्रतमुत्तमम् ।
यत्कृत्वा सर्वदुःखेभ्यो मुक्तो भवति मानवः ।। ६ ।।
विधानं च व्रतस्यास्य विप्रायाभाष्य यत्नतः ।
सत्यनारायणो वृद्घस्तत्रैवान्तरधीयत ।। ७ ।।
तद्व्रतं संकरिष्यामि यदुक्तं ब्राह्मणेन वै ।
इति सञ्चित्य विप्रोऽसौ रात्रौ निद्रां न लब्धवान् ।। ८ ।।
ततः प्रातः समुत्थाय सत्यनारायणव्रतम् ।
करिष्य इति सङ्कल्प्य भिक्षार्थमगमद् द्विजः ।। ९ ।।
तस्मिन्नेव दिने विप्रः प्रचुरं द्रव्यमाप्तवान् ।
तेनैव बन्धुभिः सार्धं सत्यस्य व्रतमाचरत् ।। १० ।।
सर्वदुःखविनिर्मुक्तः सर्वसम्पत्समन्वितः ।
बभूव स द्विजश्रेष्ठो व्रतस्यास्य प्रभावतः ।। ११ ।।
ततः प्रभृति काले च मासि मासि व्रतं कृतम् ।
एवं नारायणस्येदं व्रतं कृत्वा द्विजोत्तमः ।। १२ ।।
सर्वपापविनिर्मुक्तो दुर्लभं मोक्षमाप्तवान् ।
व्रतमस्य यदा विप्राः पृथिव्यां संकरिष्यति ।। १३ ।।
तदैव सर्वदुःखं च मनुजस्य विनश्यति ।
एवं नारायणेनोक्तं नारदाय महात्मने ।। १४ ।।
मया तत्कथितं विप्राः किमन्यत् कथयामि वः ।

ऋषय ऊचुः -

तस्माद् विप्राच्छ्रुतं केन पृथिव्यां चरितं मुने ।
तत्सर्वं श्रोतुमिच्छामः श्रद्घास्माकं प्रजायते ।। १५ ।।

सूत उवाच -

श्रृणुध्वं मुनयः सर्वे व्रतं येन कृतं भुवि ।
एकदा स द्विजवरो यथाविभवविस्तरैः ।। १६ ।।
बन्धुभिः स्वजनैः सार्धं व्रतं कर्तुं समुद्यतः ।
एतस्मिन्नन्तरे काले काष्ठक्रेता समागमत् ।। १७ ।।
बहिः काष्ठं च संस्थाप्य विप्रस्य गृहमाययौ ।
तृष्णया पीडितात्मा च दृष्ट्वा विप्रं कृतव्रतम् ।। १८ ।।
प्रणिपत्य द्विजं प्राह किमिदं क्रियते त्वया ।
कृते किं फलमाप्नोति विस्तराद् वद मे प्रभो ।। १९ ।।

विप्र उवाच -

सत्यनारायणस्येदं व्रतं सर्वेप्सितप्रदम् ।
तस्य प्रसादान्मे सर्वं धनधान्यादिकं महत् ।। २० ।।
तस्मादेतद् व्रतं ज्ञात्वा काष्ठक्रेतातिहर्षितः ।
पपौ जलं प्रसादं च भुक्त्वा स्वनगरं ययौ ।। २१ ।।
सत्यनारायणं देवं मनसा इत्यचिन्तयत् ।
काष्ठविक्रयतो ग्रामे प्राप्यते चाद्य यद्घनम् ।। २२ ।।
तेनैव सत्यदेवस्य करिष्ये व्रतमुत्तमम् ।
इति सञ्चित्य मनसा काष्ठं धृत्वा तु मस्तके ।। २३ ।।
जगाम नगरे रम्ये धनिनां यत्र संस्थितिः ।
तद्दिने काष्ठमूल्यं च द्विगुणं प्राप्तवानसौ ।। २४ ।।
ततः प्रसन्नहृदयः सपक्वं कदलीफलम् ।
शर्कराघृतदुग्धं च गोधूमस्य च चूर्णकम् ।। २५ ।।
कृत्वैकत्र सपादं च गृहीत्वा स्वगृहं ययौ ।

ततो बन्धून् समाहूय चकार विधिना व्रतम् ।। २६ ।।
तद्व्रतस्य प्रभावेण धनपुत्रान्वितोऽभवत् ।
इह लोके सुखं भुक्त्वा चान्ते सत्यपुरं ययौ ।। २७ ।।

स्कन्दपुराणे रेवाखण्डे
श्रीसत्यनारायणकथायां द्वितीयः ।। २ ।।

तृतीयोऽध्यायः

सूत उवाच -

पुनरग्रे प्रवक्ष्यामि श्रृणुध्वं मुनिसत्तमाः ।
पुरा चोल्कामुखो नाम नृपश्चासीन्महीपतिः ।। १ ।।
जितेन्द्रियः सत्यवादी ययौ देवालयं प्रति ।
दिने दिने धनं दत्त्वा द्विजान् सन्तोषयन् सुधीः ।। २ ।।
भार्या तस्य प्रमुग्धा च सरोजवदना सती ।
भद्रशीला नदीतीरे सत्यस्य व्रतमाचरत् ।। ३ ।।
एतस्मिन्नन्तरे तत्र साधुरेकः समागतः ।
वाणिज्यार्थं बहुधनैरनेकैः परिपूरितः ।। ४ ।।
नावं संस्थाप्य तत्तीरे जगाम नृपतिं प्रति ।
दृष्ट्वा स व्रतिनं भूपं पप्रच्छ विनयान्वितः ।। ५ ।।

साधुरुवाच -

किमिदं कुरुषे राजन् भक्तियुक्तेन चेतसा ।
प्रकाशं कुरु तत्सर्वं श्रोतुमिच्छामि साम्प्रतम् ।। ६ ।।

राजोवाच -

पूजनं क्रियते साधो विष्णोरतुलतेजसः ।
व्रतं च स्वजनैः सार्धं पुत्राद्यावाप्तिकाम्यया ।। ७ ।।
भूपस्य वचनं श्रुत्वा साधुः प्रोवाच सादरम् ।
सर्वं कथय मे राजन् करिष्येऽहं तवोदितम् ।। ८ ।।
ममापि सन्ततिर्नास्ति एतस्माज्जायते ध्रुवम् ।
ततो निवृत्य वाणिज्यात् सानन्दो गृहमागतः ।। ९ ।।
भार्यायै कथितं सर्वं व्रतं सन्ततिदायकम् ।
तदा व्रतं करिष्यामि यदा मे सन्ततिर्भवेत् ।। १० ।।
इति लीलावतीं प्राह पत्नीं साधुः स सत्तमः ।
एतस्मिन् दिवसे तस्य भार्या लीलावती सती ।। ११ ।।
भर्तृयुक्तानन्दचित्ताभवद्धर्मपरायणा ।
गर्भिणी साभवत्तस्य भार्या सत्यप्रसादतः ।। १२ ।।
दशमे मासि वै तस्याः कन्यारत्नमजायत ।
दिने दिने सा ववृधे शुक्लपक्षे यथा शशी ।। १३ ।।
नाम्ना कलावती चेति तन्नामकरणं कृतम् ।
ततो लीलावती प्राह स्वामिनं मधुरं वचः ।। १४ ।।
न करोषि किमर्थं वै पुरा सङ्कल्पितं व्रतम् ।

साधुरुवाच -

विवाहसमये तस्याः करिष्यामि व्रतं प्रिये ।। १५ ।।
इति भार्यां समाश्वास्य जगाम नगरं प्रति ।
ततः कलावती कन्या ववृधे पितृवेश्मनि ।। १६ ।।
दृष्ट्वा कन्यां ततः साधुर्नगरे सखिभिः सह ।

मन्त्रयित्वा द्रुतं दूतं प्रेषयामास धर्मवित् ।। १७ ।।
विवाहार्थे च कन्यायाः वरं श्रेष्ठं विचारय ।
तेनाज्ञप्तश्च दूतोऽसौ काञ्चनं नगरं ययौ ।। १८ ।।
तस्मादेकं वणिक्पुत्रं समादायागतोऽपि सः ।
दृष्ट्वा तु सुन्दरं बालं वणिक्पुत्रं गुणान्वितम् ।। १९ ।।
ज्ञातिभिर्बन्धुभिः सार्धं परितुष्टेन चेतसा ।
दत्तवान् साधुः पुत्राय कन्यां विधिविधानतः ।। २० ।।
ततो भाग्यवशात्तेन विस्मृतं व्रतमुत्तमम् ।
विवाहसमये तस्यास्तेन रुष्टोऽभवत्प्रभुः ।। २१ ।।
ततः कालेन नियतो निजकर्मविशारदः ।
वाणिज्यार्थं गतः शीघ्रं जामातृसहितो वणिक् ।। २२ ।।
रत्नसारपुरे रम्ये गत्वा सिन्धुसमीपतः ।
वाणिज्यमकरोत् साधुर्जामात्रा श्रीमता सह ।। २३ ।।
तौ गतौ नगरे रम्ये चन्द्रकेतोर्नृपस्य च ।
एतस्मिन्नेव काले तु सत्यनारायणः प्रभुः ।। २४ ।।
भ्रष्टप्रतिज्ञमालोक्य शापं तस्मै प्रदत्तवान् ।
दारुणं कठिणं चास्य महद्दुखं भवत्विति ।। २५ ।।
एकस्मिन् दिवसे राज्ञो धनमादाय तस्करः ।
तत्रैव चागतश्चोरो वणिजौ यत्र संस्थितौ ।। २६ ।।
तत्पश्चाद्धावकान् दूतान् दृष्ट्वा भीतेन चेतसा ।
धनं संस्थाप्य तत्रैव स तु शीघ्रमलक्षितः ।। २७ ।।
ततो दूताः समायाता यत्रास्ते सज्जनो वणिक् ।
दृष्ट्वा नृपधनं तत्र बध्वा नीतौ वणिक्सुतौ ।। २८ ।।
हर्षेण धावमानाश्च ऊचुर्नृपसमीपतः ।

तस्करौ द्वौ समानीतौ विलोक्याज्ञापय प्रभो ।। २९ ।।
राज्ञाज्ञप्तास्ततः शीघ्रं दृढं बध्वा तु तावुभौ ।
स्थापितौ द्वौ महादुर्गे कारागारेऽविचारतः ।। ३० ।।
मायया सत्यदेवस्य न श्रुतं कैस्तयोर्वचः ।
अतस्तयोर्धनं राज्ञा गृहीतं चन्द्रकेतुना ।। ३१ ।।
तच्छापाच्च तयोर्गेहे भार्या चैवातिदुःखिता ।
चोरेणापहृतं सर्वं गृहे यच्च स्थितं धनम् ।। ३२ ।।
आधिव्याधिसमायुक्ता क्षुत्पिपासादिदुःखिता ।
अन्नचिन्तापरा भूत्वा बभ्राम च गृहे गृहे ।। ३३ ।।
कलावती तु कन्यापि बभ्राम प्रतिवासरम् ।
एकस्मिन् दिवसे जाता क्षुधार्ता द्विजमन्दिरम् ।। ३४ ।।
गत्वापश्यद्व्रतं तत्र सत्यनारायणस्य च ।
उपविश्य कथां श्रुत्वा वरं प्रार्थितवत्यपि ।। ३५ ।।
प्रसादभक्षणं कृत्वा ययौ रात्रौ गृहं प्रति ।
माता कलावती कन्यां कथयामास प्रेमतः ।। ३६ ।।
पुत्रि रात्रौ स्थिता कुत्र किं ते मनसि वर्तते ।
कन्या कलावती प्राह मातरं प्रति सत्वरम् ।। ३७ ।।
द्विजालये व्रतं मातर्दृष्टं वाञ्छितसिद्धिदम् ।
तच्छ्रुत्वा कन्यकावाक्यं व्रतं कर्तुं समुद्यता ।। ३८ ।।
सा मुदा च वणिग्भार्या सत्यनारायणस्य च ।
व्रतं चक्रे सैव साध्वी बन्धुभिः स्वजनैः सह ।। ३९ ।।
भर्तृजामातरौ क्षिप्रमागच्छेतां स्वमाश्रमम् ।
अपराधं च मे मातुर्जामातुः क्षन्तुमर्हति ।। ४० ।।
व्रतेनानेन तुष्टोऽसौ सत्यनारायणः प्रभुः ।

दर्शयामास स्वप्नं हि चन्द्रकेतुं नृपोत्तमम् ।। ४१ ।।
बन्धिनौ मोचय प्रातर्वणिजौ नृपसत्तम ।
देयं धनं च तत्सर्वं गृहीतं यत्त्वयाऽधुना ।। ४२ ।।
नो चेत्त्वां नाशयिष्यामि सराज्यधनपुत्रकम् ।
एवमाभाष्य राजानं ध्यानगम्योऽभवत्प्रभुः ।। ४२ ।।
ततः प्रभातसमये राजा च स्वजनैः सह ।
उपविश्य सभामध्ये प्राह स्वप्नं जनं प्रति ।। ४३ ।।
बद्घौ महाजनौ शीघ्रं मोचय द्वौ वणिक्सुतौ ।
इति राज्ञो वचः श्रुत्वा मोचयित्वा महाजनौ ।। ४४ ।।
समानीय नृपस्याग्रे प्राहुस्ते विनयान्विताः ।
आनीतौ द्वौ वणिक्पुत्रौ मुक्तौ निगडबन्धनात् ।। ४५ ।।
ततो महाजनौ नत्वा चन्द्रकेतुं नृपोत्तमम् ।
स्मरन्तौ पूर्ववृत्तान्तं नोचतुर्भयविह्वलौ ।। ४७ ।।
राजा वणिक्सुतौ वीक्ष्य वचः प्रोवाच सादरम् ।
दैवात् प्राप्तं महदुःखमिदानीं नास्ति वै भयम् ।। ४८ ।।
तदा निगडसन्त्यागं क्षौरकर्माद्यकारयत् ।
वस्त्रालङ्कारकं दत्त्वा परितोष्य नृपश्च तौ ।। ४९ ।।
पुरस्कृत्य वणिक्पुत्रौ वचसाऽतोषयद् भृशम् ।
पुरानीतं तु यद् द्रव्यं द्विगुणीकृत्य दत्तवान् ।। ५० ।।
प्रोवाच तौ ततो राजा गच्छ साधो निजाश्रमम् ।
राजानं प्रणिपत्याह गन्तव्यं त्वत्प्रसादतः ।। ५१ ।।

श्रीस्कन्दपुराणे रेवाखण्डे
श्रीसत्यनारायणव्रतकथायां तृतीयः ।।

चतुर्थोऽध्यायः

सूत उवाच -

यात्रां तु कृतवान् साधुर्मङ्गलायनपूर्विकाम् ।
ब्राह्मणाय धनं दत्त्वा तदा तु नगरं ययौ ।। १ ।।
कियद्दूरे गते साधौ सत्यनारायणः प्रभुः ।
जिज्ञासां कृतवान् साधो किमस्ति तव नौस्थितम् ।। २ ।।
ततो महाजनौ मत्तौ हेलया च प्रहस्य वै ।
कथं पृच्छसि भो दण्डिन् मुद्रां नेतुं किमिच्छसि ।। ३ ।।
लतापत्रादिकं चैव वर्तते तरणौ मम ।
निष्ठुरं च वचः श्रुत्वा सत्यं भवतु ते वचः ।। ४ ।।
एवमुक्त्वा गतः शीघ्रं दण्डी तस्य समीपतः ।
कियद्दूरे ततो गत्वा स्थितः सिन्धुसमीपतः ।। ५ ।।
गते दण्डिनि साधुश्च कृतनित्यक्रियस्तदा ।
उत्थितां तरणिं दृष्ट्वा विस्मयं परमं ययौ ।। ६ ।।
दृष्ट्वा लतादिकं चैव मूर्च्छितो न्यपतद् भुवि ।
लब्धसंज्ञो वणिक्पुत्रस्ततश्चिन्तान्वितोऽभवत् ।। ७ ।।
तदा तु दुहितुः कान्तो वचनं चेदमब्रवीत् ।
किमर्थं क्रियते शोकः शापो दत्तश्च दण्डिना ।। ८ ।।
शक्यते तेन सर्वं हि कर्तुं चात्र न संशयः ।
अतस्तच्छरणं यामो वाञ्छितार्थो भविष्यति ।। ९ ।।
जामातुर्वचनं श्रुत्वा तत्सकाशं गतस्तदा ।
दृष्ट्वा च दण्डिनं भक्त्या नत्वा प्रोवाच सादरम् ।। १० ।।
क्षमस्व चापराधं मे यदुक्तं तव सन्निधौ ।
एवं पुनः पुनर्नत्वा महाशोकाकुलोऽभवत् ।। ११ ।।

प्रोवाच वचनं दण्डी विलपन्तं विलोक्य च ।
मा रोदीः श्रुणु मद्वाक्यं मम पूजाबहिर्मुखः ।। १२ ।।
ममाज्ञया च दुर्बुद्धे लब्धं दुःखं मुहुर्मुहुः ।
तच्छ्रुत्वा भगवद्वाक्यं स्तुतिं कर्तुं समुद्यतः ।। १३ ।।

साधुरुवाच -

त्वन्मायामोहिताः सर्वे ब्रह्माद्यास्त्रिदिवौकसः ।
न जानन्ति गुणान् रूपं तवाश्चर्यमिदं प्रभो ।। १४ ।।
मूढोऽहं त्वां कथं जाने मोहितस्तव मायया ।
प्रसीद पूजयिष्यामि यथा विभवविस्तरैः ।। १५ ।।
दत्त्वा वित्तं च तत्सर्वं त्राहि मां शरणागतम् ।
श्रुत्वा भक्तियुतं वाक्यं परितुष्टो जनार्दनः ।। १६ ।।
वरं च वाञ्छितं दत्त्वा तत्रैवान्तरधीयत ।
ततो नावं समारुह्य दृष्ट्वा वित्तप्रपूरिताम् ।। १७ ।।
कृपया सत्यदेवस्य सफलं वाञ्छितं मम ।
इत्युक्त्वा स्वजनैः सार्धं पूजां कृत्वा यथाविधि ।। १८ ।।
हर्षेण चाभवत् पूर्णः सत्यदेवप्रसादतः ।
नावं संयोज्य यत्नेन स्वदेशगमनं कृतम् ।। १९ ।।
साधुर्जामातरं प्राह पश्य रत्नपुरीं मम ।
दूतं च प्रेषयामास निजवित्तस्य रक्षकम् ।। २० ।।
दूतोऽसौ नगरं गत्वा साधुभार्यां विलोक्य च ।
प्रोवाच वाञ्छितं वाक्यं नत्वा बद्धाञ्जलिस्तदा ।। २१ ।।
निकटे नगरस्यैव जामात्रा सहितो वणिक् ।
आगतो बन्धुवर्गैश्च वित्तैश्च बहुभिर्युतः ।। २२ ।।

श्रुत्वा दूतमुखाद् वाक्यं महाहर्षवती सती ।
सत्यपूजां ततः कृत्वा प्रोवाच तनुजां प्रति ।। २३ ।।
व्रजामि शीघ्रमागच्छ साधु सन्दर्शनाय च ।
इति मातृवचः श्रुत्वा व्रतं कृत्वा समाप्य च ।। २४ ।।
प्रसादं च परित्यज्य गता साऽपि पतिं प्रति ।
तेन रुष्टः सत्यदेवो भर्तारं तरणिं तथा ।। २५ ।।
संहृत्य च धनैः सार्धं जले तस्यावमज्जयत् ।
ततः कलावती कन्या न विलोक्य निजं पतिम् ।। २६ ।।
शोकेन महता तत्र रुदती चापतद् भुवि ।
दृष्ट्वा तथाविधां नावं कन्यां च बहुदुःखिताम् ।। २७ ।।
भीतेन मनसा साधुः किमाश्चर्यमिदं भवेत् ।
चिंत्यमानाश्च ते सर्वे बभूवुस्तरिवाहकाः ।। २८ ।।
ततो लीलावती कन्यां दृष्ट्वा सा विह्वलाऽभवत् ।
विललापातिदुःखेन भर्तारं चेदमब्रवीत् ।। २९ ।।
इदानीं नौकया सार्धं कथं सोऽभूदलक्षितः ।
न जाने कस्य देवस्य हेलया चैव सा हृता ।। ३० ।।
सत्यदेवस्य माहात्म्यं ज्ञातुं वा केन शक्यते ।
इत्युक्त्वा विललापैव ततश्च स्वजनैः सह ।। ३१ ।।
ततो लीलावती कन्यां क्रोडे कृत्वा रुरोद ह ।
ततः कलावती कन्या नष्टे स्वामिनि दुःखिता ।। ३२ ।।
गृहीत्वा पादुकां तस्यानुगन्तुं च मनो दधे ।
कन्यायाश्चरितं दृष्ट्वा सभार्यः सज्जनो वणिक् ।। ३३ ।।
अतिशोकेन सन्तप्तश्चिन्तयामास धर्मवित् ।
हृतञ्च सत्यदेवेन भ्रान्तोऽहं सत्यमायया ।। ३४ ।।

तस्य पूजां करिष्यामि यथाविभवविस्तरैः ।
इति सर्वान् समाहूय कथयित्वा मनोरथम् ।। ३५ ।।
नत्वा च दण्डवद् भूमौ सत्यदेवं पुनः पुनः ।
ततस्तुष्टः सत्यदेवो दीनानां परिपालकः ।। ३६ ।।
जगाद वचनं चैनं कृपया भक्तवत्सलः ।
त्यक्त्वा प्रसादं ते कन्या पतिं द्रष्टुं समागता ।। ३७ ।।
अतोऽदृष्टोऽभवत्तस्याः कन्यकायाः पतिर्ध्रुवम् ।
गृहं गत्वा प्रसादं च भुक्त्वा साऽऽयाति चेत्पुनः ।। ३८ ।।
लब्धभर्त्री सुता साधो भविष्यति न संशयः ।
कन्यका तादृशं वाक्यं श्रुत्वा गगनमण्डलात् ।। ३९ ।।
क्षिप्रं तदा गृहं गत्वा प्रसादं च बुभोज सा ।
सा पश्चात् पुनरागत्य ददर्श स्वजनं पतिम् ।। ४० ।।
ततः कलावती कन्या जगाद पितरं प्रति ।
इदानीं च गृहं याहि विलम्बं कुरुषे कथम् ।। ४१ ।।
तच्छ्रुत्वा कन्यकावाक्यं सन्तुष्टोऽभूद् वणिक्सुतः ।
पूजनं सत्यदेवस्य कृत्वा विधिविधानतः ।। ४२ ।।
धनैर्बन्धुगणैः सार्धं जगाम निजमन्दिरम् ।
पौर्णमास्यां च सङ्क्रान्तौ कृतवान् सत्यपूजनम् ।
इहलोके सुखं भुक्त्वा चान्ते सत्यपुरं ययौ ।। ४३ ।।

श्रीस्कन्दपुराणे रेवाखण्डे
सत्यनारायणकथायां चतुर्थः ।। ४ ।।

पञ्चमोऽध्यायः

सूत उवाच-

अथान्यच्च प्रवक्ष्यामि शृणुध्वं मुनिसत्तमाः ।
आसीत्तुङ्गध्वजो राजा प्रजापालनतत्परः ।। १ ।।
प्रसादं सत्यदेवस्य त्यक्त्वा दुःखमवाप सः ।
एकदा स वनं गत्वा हत्वा बहुविधान् पशून् ।। २ ।।
आगत्य वटमूलं च दृष्ट्वा सत्यस्य पूजनम् ।
गोपाः कुर्वन्ति सन्तुष्टा भक्तियुक्ताः सबान्धवाः ।। ३ ।।
राजा दृष्ट्वा तु दर्पेण न गत्वा तं ननाम सः ।
ततो गोपगणाः सर्वे प्रसादं नृपसन्निधौ ।। ४ ।।
संस्थाप्य पुनरागत्य भुक्तास्सर्वे यथेप्सितम् ।
ततः प्रसादं सन्त्यज्य राजा दुःखमवाप सः ।। ५ ।।
तस्य पुत्रशतं नष्टं धनधान्याधिकं च यत् ।
सत्यदेवेन तत्सर्वं नाशितं मम निश्चितम् ।। ६ ।।
अतस्तत्रैव गच्छामि यत्र देवस्य पूजनम् ।
मनसा तु विनिश्चित्य ययौ गोपालसन्निधौ ।। ७ ।।
ततोऽसौ सत्यदेवस्य पूजां गोपगणैः सह ।
भक्तिश्रद्घान्वितो भूत्वा चकार विधिना नृपः ।। ८ ।।
सत्यदेवप्रसादेन धनपुत्रान्वितोऽभवत् ।
इह लोके सुखं भुक्त्वा चान्ते सत्यपुरं ययौ ।। ९ ।।
य इदं कुरुते सत्यव्रतं परमदुर्लभम् ।
शृणोति च कथां पुण्यां भक्तियुक्तः फलप्रदम् ।। १० ।।
धनधान्यादिकं तस्य भवेत् सत्यप्रसादतः ।
दरिद्रो लभते वित्तं बद्घो मुच्येत बन्धनात् ।। ११ ।।

भीतो भयात् प्रमुच्येत सत्यमेव न संशयः ।
ईप्सितं च फलं भुक्त्वा चान्ते सत्यपुरं व्रजेत् ।। १२ ।।
इति वः कथितं विप्राः सत्यनारायणव्रतम् ।
यत्कृत्वा सर्वदुःखेभ्यो मुक्तो भवति मानवः ।। १३ ।।
विशेषतः कलियुगे सत्यपूजा फलप्रदा ।
केचित् कालं वदिष्यन्ति सत्यमीशं तमेव च ।। १४ ।।
सत्यनारायणं केचित् सत्यदेवं तथापरे ।
नानारूपधरो भूत्वा सर्वेषामीप्सितप्रदः ।। १५ ।।
भविष्यति कलौ सत्यव्रतरूपी सनातनः ।
य इदं पठते नित्यं श्रृणोति मुनिसत्तमाः ।
सत्यं नश्यन्ति पापानि सत्यदेवप्रसादतः ।। १६ ।।

श्रीस्कन्दपुराणे रेवाखण्डे
सत्यनारायणकथायां पञ्चमः ।। ५ ।।

।। श्रीः ।।

अथ श्रीभविष्ये महापुराणे
प्रतिसर्गपर्वणि द्वितीयखण्डे
चतुर्विंशोऽध्यायः

व्यास उवाच

एकदा नैमिषारण्ये ऋषयः शौनकादयः ।
पृच्छन्ति विनयेनैव सूतं पौराणिकं खलु ।। १ ।।

भगवन् ब्रूहि लोकानां हितार्थाय चतुर्युगे ।
कः पूज्यः सेवितव्यश्च वाञ्छितार्थप्रदायकः ।। २ ।।

विनायासेन वै कामं प्राप्नुयुर्मानवाः शुभम् ।
सत्यं ब्रह्मन् वदोपायं नराणां कीर्तिकारकम् ।। ३ ।।

सूत उवाच

नवाम्भोजनेत्रं रमाकेलिपात्रं
चतुर्बाहुचामीकराचारुगात्रम् ।
जगत्त्राणहेतुं रिपौ धूम्रकेतुं
सदा सत्यनारायणं स्तौमि देवम् ।। ४ ।।

श्रीरामं सहलक्ष्मणं सकरुणं सीतान्वितं सात्त्विकं
वैदेहीमुखपद्मलुब्धमधुपं पौलस्त्यसंहारकम् ।
वन्दे वन्द्यपदाम्बुजं सुरवरं भक्तानुकम्पाकरम्

शत्रुघ्नेन हनूमता च भरतेनासेवितं राघवम् ।। ५ ।।

कलिकलुषविनाशं कामसिद्धिप्रकाशम्
सुरवरमुखभासं भूसुरेण प्रकाशम् ।
विबुधजनविलासं साधुचर्याविशेषम्
नृपतिवरचरित्रं भोः शृणुष्वेतिहासम् ।। ६ ।।

एकदा नारदो योगी परानुग्रहवाञ्छया ।
पर्यटन् विविधांल्लोकान् मर्त्यलोकमुपागमत् ।। ७ ।।

तत्र दृष्ट्वा जनान् सर्वान् नानाक्लेशसमन्वितान् ।
आधिव्याधियुतानार्तान् पच्यमानान् स्वकर्मभिः ।। ८ ।।

केनोपायेन चैतेषां दुःखनाशो भवेद्ध्रुवम् ।
इति सञ्चिन्त्य मनसा विष्णुलाकं गतस्तदा ।। ९ ।।

तत्र नारायणं देवं शुक्लवर्णं चतुर्भुजम् ।
शंखचक्रगदापद्मवनमालाविभूषितम् ।। १० ।।

प्रसन्नवदनं शान्तं सनकाद्यैरभिष्टुतम् ।
दृष्ट्वा तं देवदेवेशं स्तोतुं समुपचक्रमे ।। ११ ।।

नारद उवाच
नमो वाङ्मनसातीतरूपायानन्तशक्तये ।

नादिमध्यान्तदेवाय निर्गुणाय महात्मने ।। १२ ।।

सर्वेषामादिभूताय लोकानामुपकारिणे ।
अपारपरिमाणाय तपोधाम्ने नमो नमः ।। १३ ।।

सूत उवाच
इति श्रुत्वा स्तुतिं विष्णुर्नारदं प्रत्यभाषत ।
किमर्थमागतोऽसि त्वं किं ते मनसि वर्तते ।। १४ ।।

कथयस्व महाभाग तत्सर्वं कथयामि ते ।
श्रुत्वा तु नारदो विष्णुमुक्तवान् सर्वकारणम् ।। १५ ।।

नारदस्य वचः श्रुत्वा साधुसाध्वित्यपूजयत् ।
शृणु नारद वक्ष्यामि व्रतमेकं सनातनम् ।। १६ ।।

कृते त्रेतायुगे विष्णुर्द्वापरेऽनेकरूपधृक् ।
कलौ प्रत्यक्षफलदः सत्यनारायणो विभुः ।। १७ ।।

चतुष्पादो हि धर्मस्य तस्य सत्यं प्रसाधनम् ।
सत्येन धार्यते लोकः सत्ये ब्रह्म प्रतिष्ठितम् ।। १८ ।।

सत्यनारायणव्रतमतः श्रेष्ठतमं स्मृतम् ।
इति श्रुत्वा हरेर्वाक्यं नारदः पुनरब्रवीत् ।। १९ ।।

किं फलं किं विधानं च सत्यनारायणार्चने ।
तत्सर्वं कृपया देव कथयस्व कृपानिधे ।। २० ।।

भगवानुवाच
नारायणार्चने वक्तुं फलं नालं चतुर्मुखः ।
शृणु संक्षेपतो ह्येतत्कथयामि तवाग्रतः ।। २१ ।।
निर्धनोऽपि धनाढ्यः स्यादपुत्रः पुत्रवान् भवेत् ।
भ्रष्टराज्यो लभेद्राज्यमन्धोऽपि स्यात्सुलोचनः ।। २२ ।।
मुच्यते बन्धनाद्भद्घो निर्भयः स्याद् भयातुरः ।
मनसा कामयेद्यं यं लभते तं विधानतः ।। २३ ।।

इह जन्मनि भो विप्र भक्त्या च विधिनार्चयेत् ।
लभेत्कामं हि तच्छीघ्रं नात्र कार्या विचारणा ।। २४ ।।

प्रातःस्नायी शुचिर्भूत्वा दन्तधावनपूर्वकम् ।
तुलसीमञ्जरीं धृत्वा ध्यायेत्सत्यस्थितं हरिम् ।। २५ ।।

नारायणं सान्द्रघनावदातम् । चतुर्भुजं पीतमहार्हवाससम् ।।
प्रसन्नवक्त्रं नवकञ्जलोचनम् । सनन्दनाद्यैरुपसेवितं भजे।। २६ ।।

करोमि ते व्रतं देव सायंकाले त्वदर्चनम् ।
श्रुत्वा गाथां त्वदीयां हि प्रसादं ते भजाम्यहम् ।। २७ ।।

इति संकल्प्य मनसा सायंकाले प्रपूजयेत् ।
पञ्चभिः कलशैर्जुष्टं कदलीतोरणान्वितम् ।। २८ ।।

शालग्रामं स्वर्णयुक्तं पूजयेदात्मसूक्तकैः ।
पञ्चामृतेन संस्नाप्य चन्दनादिभिरर्चयेत् ।। २९ ।।

ॐनमो भगवते नित्यं सत्यदेवाय धीमहि ।
चतुःपदार्थदात्रे च नमस्तुभ्यं नमो नमः ।। ३० ।।

जप्त्वेत्यष्टोत्तरशतं जुहुयात्तद्दशांशकम् ।
तर्पणं मार्जनं कृत्वा कथां श्रुत्वा हरेरिमाम् ।। ३१ ।।

षडध्यायीं सत्यमुख्यां तत्पश्चात्तत्प्रसादकम् ।
सम्यग्विभज्य तत्सर्वं दापयेच्छ्रोतृकाय च ।। ३२ ।।

आचार्यायादिभागं च द्वितीयं स्वकुलाय सः ।
श्रोतृभ्यश्च तृतीयं च चतुर्थं चात्महेतवे ।। ३३ ।।

विप्रेभ्यो भोजनं दद्यात्स्वयं भुञ्जीत वाग्यतः ।
देवर्षेऽनेन विधिना सत्यनारायणार्चनम् ।। ३४ ।।

कारयेद्यदि भक्त्या च श्रद्धया च समन्वितः ।
व्रती कामानवाप्नोति वाञ्छितानीह जन्मनि ।। ३५ ।।

इहजन्मकृतं कर्म परजन्मनि पद्यते ।
परजन्मकृतं कर्म भोक्तव्यं सर्वदा नरैः ।। ३६ ।।

सत्यनारायणव्रतमिह सर्वान् कामान् ददाति हि ।
अद्यैव जगतीमध्ये स्थापयामि त्वदाज्ञया ।। ३७ ।।

इत्युक्त्वान्तर्दधे देवो नारदः स्वर्गतिं ययौ ।
स्वयं नारायणो देवः काश्यां पुर्यां समागतः ।। ३८ ।।

इति श्रीभविष्ये महापुराणे
प्रतिसर्गपर्वणि द्वितीयखण्डे
कलियुगीयेतिहाससमुच्चये
चतुर्विंशोऽध्यायः

अथ
श्रीभविष्ये महापुराणे
प्रतिसर्गपर्वणि द्वितीयखण्डे
पञ्चविंशोऽध्यायः

सूत उवाच
कृपया ब्राह्मणद्वारा प्रकटीकृतवान् स्वकम् ।
इतिहासमिमं वक्ष्ये संवादं हरिविप्रयोः ।। १ ।।

काशीपुरीति विख्याता तत्रासीद्ब्राह्मणो वरः ।
दीनो गृहाश्रमी नित्यं भिक्षुः पुत्रकलत्रवान् ।। २ ।।
शतानन्द इति ख्यातो विष्णुव्रतपरायणः ।
एकदा पथि भिक्षार्थं गच्छतस्तस्य श्रीपतिः ।। ३ ।।

विनीतस्याति शान्तस्य स बभूवाक्षिगोचरः ।
वृद्घब्राह्मणवेषेण पप्रच्छ ब्राह्मणं हरिः ।
क्व यासीति द्विजश्रेष्ठ वृत्तिः कामेन कथ्यताम् ।। ४ ।।

शतानन्द उवाच
भिक्षावृत्तिरहं सौम्य कलत्रापत्यहेतवे ।
याचितुं धनिनां द्वारि व्रजामि धनमुत्तमम् ।। ५ ।।

नारायण उवाच
भिक्षावृत्तिस्त्वया दीर्घकालं द्विज सदा धृता ।
तद्वारक उपायोऽयं विशेषेण कलौ किल ।। ६ ।।

ममोपदेशतो विप्र सत्यनारायणं भज ।
दारिद्र्यशोकशमनं सन्तापहरणं हरेः ।
चरणं शरणं याहि मोक्षदं पद्मलोचनम् ।। ७ ।।

एवं सम्बोधितो विप्रो हरिणा करुणात्मना ।
पुनः पप्रच्छ विप्रोऽसौ सत्यनारायणो हि कः ।। ८ ।।

वृद्घब्राह्मण उवाच

बहुरूपः सत्यसन्धः सर्वव्यापी निरञ्जनः ।
इदानीं विप्ररूपेण तव प्रत्यक्षमागतः ।। ९ ।।

दुःखोदधिनिमग्नानां तरणिश्चरणौ हरेः ।
कुशलाः शरणं यान्ति नेतरे विषयात्मकाः ।। १० ।।

आहृत्य पूजासम्भारान्हिताय जगतां द्विज ।
अर्चयंस्तमनुध्यायंस्त्वमेतत्प्रकटीकुरु ।। ११ ।।

इति ब्रुवन्तं विप्रोऽसौ ददर्श पुरुषोत्तमम् ।
जलदश्यामलं चारुचतुर्बाहुं गदादिभिः ।। १२ ।।

पीताम्बरं नवाम्भोजलोचनं स्मितपूर्वकम् ।
वनमालामधुव्रातचुम्बितांघ्रिसरोरुहम् ।। १३ ।।

निशम्य पुलकाङ्गोऽसौ प्रेमपूर्णसुलोचनः ।
स्तुवन् गद्गदया वाचा दण्डवत्पतितो भुवि ।। १४ ।।

प्रणमामि जगन्नाथं जगत्कारणकारकम् ।
अनाथनाथं शिवदं शरण्यमनघं शुचिम् ।। १५ ।।
अव्यक्तं व्यक्ततां यातं तापत्रयविमोचनम् ।। १६ ।।
नमः सत्यनारायणायास्य कर्त्रे नमः शुद्घसत्त्वाय विश्वस्य भर्त्रे ।
करालाय कालाय विश्वस्य हर्त्रे नमस्ते जगन्मङ्गलायात्ममूर्ते ।। १७ ।।

धन्योऽस्म्यद्य कृती धन्यो भवोऽद्य सफलो मम ।
वाङ्मनोऽगोचरो यस्त्वं मम प्रत्यक्षमागतः ।। १८ ।।

दिष्टं किं वर्णयाम्याहो न जाने कस्य वा फलम् ।
क्रियाहीनस्य मन्दस्य देहोऽयं फलवान्कृतः ।। १९ ।।

पूजनं च प्रकर्तव्यं लोकनाथ रमापते ।
विधिना केन कृपया तदाज्ञापय मां विभो ।। २० ।।

हरिस्तमाह मधुरं सस्मितं विश्वमोहनः ।
पूजायां मम विप्रेन्द्र बहु नापेक्षितं धनम् ।। २१ ।।

अनायासेन लब्धेन श्रद्घामात्रेण मां यज ।
ग्राहग्रस्तोऽजामिलो वा यथाऽभून्मुक्तसंकटः ।। २२ ।।

विधानं शृणु विप्रेन्द्र मनसा कामयेत्फलम् ।
पूजासम्भृतसम्भारः पूजां कुर्याद्यथाविधि ।। २३ ।।

गोधूमचूर्णं पादार्धं सेटकादिप्रमाणतः ।
दुग्धेन तावता युक्तं मिश्रितं शर्करादिभिः ।। २४ ।।

तच्चूर्णं हरये दद्यात् घृतयुक्तं हरिप्रियम् ।
गोदुग्धेनैव दधिना गोघृतेन समन्वितम् ।। २५ ।।

गङ्गाजलेन मधुना युक्तं पञ्चामृतं प्रियम् ।
पञ्चामृतेन संस्नाप्य शालग्रामोद्भवां शिलाम् ।। २६ ।।

गन्धपुष्पादिभिर्द्रव्यैर्वेदवादैर्मनोहरैः ।
धूपैर्दीपैश्च नैवेद्यैस्ताम्बूलादिभिरर्चयेत् ।। २७ ।।

मृष्टान्नदानसन्मानैर्भक्ष्यैर्भोज्यैः फलैस्तथा ।
ऋतुकालोद्भवैः पुष्पैः पूजयेद्भक्तितत्परः ।। २८ ।।

ब्राह्मणैः स्वजनैश्चैव वेष्टितः श्रद्धयान्वितः ।
त्वया सार्धं मम कथां शृणुयात्परमादरात् ।। २९ ।।

इतिहासं तथा राज्ञो भिल्लानां वणिजोऽस्य च ।
कथान्ते प्रणमेद्भक्त्या प्रसादं विभजेत्ततः ।। ३० ।।

लब्धं प्रसादं भुञ्जीत मानयन्नविचारयेत् ।
द्रव्यादिभिर्न मे शान्तिर्भक्त्या केवलया यथा ।। ३१ ।।

विधिनानेन विप्रेन्द्र पूजयन्ति च ये नराः ।
पुत्रपौत्रधनैर्युक्ता भुक्त्वा भोगाननुत्तमान् ।। ३२ ।।

अन्ते सान्निध्यमासाद्य मोदन्ते ते मया सह ।
यं यं कामयते कामं सुव्रती तन्तमाप्नुयात् ।। ३३ ।।

इत्युक्त्वान्तर्दधे विष्णुर्विप्रोऽपि सुखमाप्तवान् ।
प्रणम्यागाद् यथादिष्टं मनसा कौतुकाकुलः ।। ३४ ।।

अद्य भैक्ष्येण लभ्येन पूज्यो नारायणो मया ।
इति निश्चित्य मनसा भिक्षार्थी नगरं गतः ।। ३५ ।।

विना देहीति वचनं लब्ध्वा च विपुलं धनम् ।
कौतुकायासमनसा जगाम निजमालयम् ।। ३६ ।।

वृत्तान्तं सर्वमाचख्यौ ब्राह्मणी सान्वमोदत ।
सादरं द्रव्यसम्भारमाहृत्य भर्तुराज्ञया ।। ३७ ।।

आहूय बन्धुमित्राणि तथा सान्निध्यवर्तिनः ।
सत्यनारायणं देवं यजामि स्वगणैर्वृतः ।। ३८ ।।

भक्त्या तुतोष भगवान् सत्यनारायणः स्वयम् ।
कामं दित्सुः प्रादुरासीत्कथान्ते भक्तवत्सलः ।। ३९ ।।

वव्रे विप्रोऽभिलषितमिहामुत्र सुखप्रदम् ।
भक्तिं परां भगवति तथा तत्सङ्गिनां व्रतम् ।। ४० ।।

रथं कुञ्जरं मञ्जुलं मन्दिरं च हयं चारु चामीकरालङ्कृतं च ।
धनं दाससदासीगणं गां महीं च लुलायः स दुग्धा हरे देहि दास्यम् ।।४१।।

तथास्त्विति हरिः प्राह ततश्चान्तर्दधे प्रभुः ।
विप्रोऽपि कृतकृत्योऽभूत्सर्वे लोका विसिस्मिरे ।। ४२ ।।

प्रणम्य भुवि कायेन प्रसादं प्रापुरादरात् ।
स्वं स्वं धाम समाजग्मुर्धन्यधन्येति वादिनः ।। ४३ ।।

प्रचचार ततो लोके सत्यनारायणार्चनम् ।
कामसिद्धिप्रदं मुक्तिभुक्तिदं कलुषापहम् ।। ४४ ।।

इति
श्रीभविष्ये महापुराणे
प्रतिसर्गपर्वणि द्वितीयखण्डे
कलियुगीयेतिहाससमुच्चये
पञ्चविंशोऽध्यायः

अथ
श्रीभविष्ये महापुराणे
प्रतिसर्गपर्वणि द्वितीयखण्डे
षड्विंशोऽध्यायः

सूत उवाच
राजासीद्धार्मिकः कश्चित्केदारमणिपूरके ।
चन्द्रचूड इति ख्यातः प्रजापालनतत्परः ।। १ ।।

शान्तो मधुरवाग्धीरो नारायणपरायणः ।
बभूवुः शत्रवस्तस्य म्लेच्छा विन्ध्यनिवासिनः ।। २ ।।

तस्य तैरवभद्युद्घमतिप्रबलदारुणैः ।
भुशुण्डीयुद्घनिपुणैः क्षेपणैः परिघायुधैः ।। ३ ।।

चन्द्रचूडस्य महती सेना यमपुरे गता ।
शतं रथास्तथा नागा सहस्रं तु हयास्तथा ।। ४ ।।

पत्तयः पञ्चसाहस्रा मृताः स्वर्गपुरं ययुः ।
दस्यवः पञ्चसाहस्रा मृताः कैतवयोधिनः ।। ५ ।।

आक्रान्तः स महाभागस्तैर्म्लेच्छैर्दम्भयोधिभिः ।
त्यक्त्वा राष्ट्रं च नगरं सैकाकी वनमाययौ ।। ६ ।।

तीर्थव्याजेन स नृपः पुरीं काशीं समागतः ।
तत्र नारायणं देवं वन्द्यं सर्वगृहे गृहे ।। ७ ।।

ददर्श नगरीं चैव धनधान्यसमन्विताम् ।
यथा द्वारवती ज्ञेया तथा सा च पुरी शुभा ।। ८ ।।

विस्मितश्चन्द्रचूडश्च दृष्ट्वाश्चर्यमनुत्तमम् ।
सत्येन रुद्घितां लक्ष्मीं शीलधर्मसमन्विताम् ।। ९ ।।

दृष्ट्वा श्रुत्वा सदानन्दं सत्यदेवप्रपूजकम् ।
पतित्वा तच्चरणयोः प्रणनाम मुदा युतः ।। १० ।।

द्विजराज नमस्तुभ्यं सदानन्द महामते ।
भ्रष्टराज्यं च मां ज्ञात्वा कृपया मां समुद्घर ।। ११ ।।

यथा प्रसन्नो भगवांल्लक्ष्मीकान्तो जनार्दनः ।
तथा तद्वद यद्योग्यं व्रतं पापप्रणाशनम् ।। १२ ।।

सदानन्द उवाच
दुःखशोकादिशमनं धनधान्यप्रवर्धनम् ।
सौभाग्यसन्ततिकरं सर्वत्र विजयप्रदम् ।। १३ ।।

सत्यनारायणव्रतं श्रीपतेस्तुष्टिकारकम् ।
यस्मिन्कस्मिन्दिने भूप यजेच्चैव निशामुखे ।। १४ ।।

तोरणादि प्रकर्तव्यं कदलीस्तम्भमण्डितम् ।
पञ्चभिः कलशैर्युक्तं ध्वजपञ्चसमन्वितम् ।। १५ ।।

तन्मध्ये वेदिकां रम्यां कारयेत्स व्रती द्विजैः ।
तत्र स्थाप्य शिलारूपं कृष्णं स्वर्णसमन्वितम् ।। १६ ।।

कुर्याद्गन्धादिभिः पूजां प्रेमभक्तिसमन्वितः ।
भूमिशायी हरिं ध्यायन्सप्तरात्रं व्यतीतयेत् ।। १७ ।।

इति श्रुत्वा स नृपतिः काश्यां देवमपूजयत् ।
रात्रौ प्रसन्नो भगवान्ददौ राज्ञेऽसिमुत्तमम् ।। १८ ।।

शत्रुपक्षक्षयकरं प्राप्य खड्गं नृपोत्तमः ।
प्रणम्य च सदानन्दं केदारमणिमाययौ ।। १९ ।।

हत्वा दस्यून्षष्टिशतांस्तेषां लब्ध्वा महद्धनम् ।
हरिं प्रपूजयामास नर्मदायास्तटे शुभे ।। २० ।।

पौर्णमास्यां विधानेन मासि मासि नृपोत्तमः ।
अपूजयेत्सत्यदेवं प्रेमभक्तिसमन्वितः ।। २१ ।।

तद्व्रतस्य प्रभावेन लक्षग्रामाधिपोऽभवत् ।
राज्यं कृत्वा सषष्ट्यब्दमन्ते विष्णुपुरं ययौ ।। २२ ।।

इति
श्रीभविष्ये महापुराणे
प्रतिसर्गपर्वणि द्वितीयखण्डे
कलियुगीयेतिहाससमुच्चये चन्द्रचूडोद्धारो नाम
षड्विंशोऽध्यायः

अथ
श्रीभविष्ये महापुराणे
प्रतिसर्गपर्वणि द्वितीयखण्डे
सप्तविंशोऽध्यायः

सूत उवाच
अथेतिहासं शृणुत यथा भिल्लाः कृतार्थिनः ।
विचरन्तो वने नित्यं निषादाः काष्ठवाहिनः ।। १ ।।

वनात्काष्ठानि विक्रेतुं पुरीं काशीं ययुः क्वचित् ।
एकस्तृषाकुलो यातो विष्णुदासाश्रमं तदा ।। २ ।।

ददर्श विपुलैश्वर्यं सेवितं च द्विजैर्हरिम् ।
जलं पीत्वा विस्मितोऽभूद्भिक्षुकस्य कुतो धनम् ।। ३ ।।

यो दृष्टोऽकिञ्चनो विप्रो दृश्यतेऽद्य महाधनः ।
इति सञ्चिन्त्य हृदये स पप्रच्छ द्विजेत्तमम् ।। ४ ।।

ऐश्वर्यं ते कुतो ब्रह्मन्दुर्गतिस्ते कुतो गता ।
आज्ञापय महाभाग श्रोतुमिच्छामि तत्त्वतः ।। ५ ।।

सदानन्द उवाच
सत्यनारायणस्याङ्गसेवया किं न लभ्यते ।
न किञ्चित्सुखमाप्नोति विना तस्यानुकम्पया ।। ६ ।।

निषाद उवाच
अहो किमिति महात्म्यं सत्यनारायणार्चने ।
विधानं सोपचारं च ह्युपदेष्टुं त्वमर्हसि ।। ७ ।।

साधूनां समचित्तानामुपकारवतां सताम् ।
न गोप्यं विद्यते किञ्चिदार्तानामार्तिनाशनम् ।। ८ ।।

इति पृष्टो विधिं वक्तुमितिहासमथाब्रवीत् ।
चन्द्रचूडो महीपालः केदारमणिपूरके ।। ९ ।।

महाश्रमं समायातः सत्यनारायणार्चने ।
विधानं श्रोतुकामोऽसौ मामाह सादरं वचः ।। १० ।।

मया यत्कथितं तस्मै तन्निबोध निषादज ।
संकल्प्य मनसा कामं निष्कामो वा जनः क्वचित् ।। ११ ।।

गोधूमचूर्णं पादार्धं सेटकाद्यैः सुचूर्णकम् ।
संस्कृतं मधुगन्धाज्यैर्नैवेद्यं विभवेऽर्पयेत् ।। १२ ।।

पञ्चामृतेन संस्नाप्य चन्दनाद्यैश्च पूजयेत् ।
पायसापूपसंयावदधिक्षीरमथो हरेत् ।। १३ ।।

उच्चावचैः फलैः पुष्पैर्धूपदीपैर्मनोरमैः ।
पूजयेत्परया भक्त्या विभवे सति विस्तरैः ।। १४ ।।

न तुष्येद्द्रव्यसम्भारैर्भक्त्या केवलया यथा ।
भगवान्परितः पूर्णो न मानं शृणुयात्क्वचित् ।। १५ ।।

दुर्योधनकृतां त्यक्त्वा राजपूजां जनार्दनः ।
विदुरस्याश्रमे वासमातिथ्यं जगृहे विभुः ।। १६ ।।

सुदाम्नस्तण्डुलकणाञ्जग्ध्वा मानुष्यदुर्लभाः ।
सम्पदोऽदाद्घरिः प्रीत्या भक्तिमात्रमपेक्ष्यते ।। १७ ।।

गोपो गृध्रो वणिग्व्याधो हनुमान्सविभीषणः ।
येऽन्ये पापात्मका दैत्या वृत्रका यादवादयः ।। १८ ।।

नारायणान्तिकं प्राप्य मोदन्तेऽद्यापि यद्वशाः ।
इति श्रुत्वा नरपतिः पूजासम्भारमादरात् ।। १९ ।।

कृतवान्स धनं लब्ध्वा मोदते नर्मदातटे ।
निषाद त्वमपि प्रीत्या सत्यनारायणं भज ।। २० ।।

इहलोके सुखं प्राप्य चान्ते सान्निध्यमाप्नुयाः ।
कृतकृत्यो निषादोऽभूत्प्रणम्य द्विजपुङ्गवम् ।। २१ ।।

स गत्वा स्वगणानाह माहात्म्यं हरिसेवने ।
ते हृष्टमनसः सर्वे समयं चक्रुरादृताः ।। २२ ।।

सत्यनारायणे पूजां काष्ठलब्धेन यावता ।
वयं कुलैः करिष्यामः पुण्यवृक्षविधानतः ।। २३ ।।

इति निश्चित्य मनसा काष्ठं विक्रीय लेभिरे ।
चतुर्गुणं धनं हृष्टाः स्वं स्वं भवनमाययुः ।। २४ ।।

मुदा स्त्रीभ्यस्समाचख्युर्वृत्तान्तं सर्वमादितः ।
ताः श्रुत्वा हृष्टमनसः पूजनं चक्रुरादरात् ।। २५ ।।

कथान्ते प्राणमन्भक्त्या प्रसादं जगृहुस्ततः ।
स्वजातिभ्यः परेभ्यश्च ददुस्तच्चूर्णमुत्तमम् ।। २६ ।।

पूजाप्रभावतो भिल्लाः पुत्रदारादिभिर्युताः ।
लब्ध्वा भूमितले द्रव्यं ज्ञानचक्षुर्महोत्तमम् ।। २७ ।।

भुक्त्वा भोगान्यथेष्टं ते दरिद्रान्धा द्विजोत्तम ।
जग्मुस्ते वैष्णवं धाम योगिनामपि दुर्लभम् ।। २८ ।।

इति
श्रीभविष्ये महापुराणे
प्रतिसर्गपर्वणि द्वितीयखण्डे
कलियुगीयेतिहाससमुच्चये
सप्तविंशोऽध्यायः

अथ

श्रीभविष्ये महापुराणे

प्रतिसर्गपर्वणि द्वितीयखण्डे

अष्टाविंशोऽध्यायः

सूत उवाच
अथ ते वर्णयिष्यामि कथां साधूपचारिताम् ।
नृपोपदेशतः साधुः कृतार्थोऽभूद्वणिग्यथा ।। १ ।।

मणिपूरपती राजा चन्द्रचूडो महायशाः ।
सह प्रजाभिरानर्च सत्यनारायणं प्रभुम् ।। २ ।।

अथ रत्नपुरस्थायी साधुर्लक्षपतिर्वणिक् ।
धनैरापूर्य तरणीः सह गच्छन्नदीतटे ।। ३ ।।

ददर्श बहुलं लोकं नानाग्रामविलासिनम् ।
मणिमुक्ताविरचितैर्वितानैस्समलंकृतम् ।। ४ ।।

वेदवेदांश्च शुश्राव गीतवादित्रसङ्गतान् ।
रम्यं स्थानं समालोक्य कर्णधारं समादिशत् ।। ५ ।।

विश्रामयात्रतरणीरिति पश्यामि कौतुकम् ।
भर्त्रादिष्टस्तथा चक्रे कर्णधारः सभृत्यकैः ।। ६ ।।

तटसीम्नः समुत्तीर्य मल्ललीलाविसासिनः ।
कर्णधारा नगा मीरा युयुधुर्मल्ललीलया ।। ७ ।।

स्वयमुत्तीर्य सामात्यो लोकान्पप्रच्छ सादरम् ।
यज्ञस्थानं समालोक्य प्रशस्तं समुदो ययौ ।। ८ ।।

किमत्र क्रियते सभ्या भवद्भिर्लोकपूजितैः ।
सभ्या ऊचुश्च ते सर्वे सत्यनारायणो विभुः ।। ९ ।।

पूज्यते बन्धुभिः सार्धं राज्ञा लोकानुकम्पिना ।
प्राप्तं निष्कण्टकं राज्यं सत्यनारायणार्चनात् ।। १० ।।

धनार्थी लभते द्रव्यं पुत्रार्थी सुतमुत्तमम् ।
ज्ञानार्थी लभते चक्षुर्निर्भयः स्याद्भयातुरः ।। ११ ।।

सर्वान्कामानवाप्नोति नरः सत्यसुरार्चनात् ।
विधानं तु ततः श्रुत्वा चेलं बद्ध्वा गलेऽसकृत् ।। १२ ।।

दण्डवत्प्रणिपत्याह कामं सभ्यानमोदयत् ।
अनपत्योऽस्मि भगवन्वृथैश्वर्यो वृथोद्यमः ।। १३ ।।

पुत्रं वा यदि वा कन्यां लभेयं त्वत्प्रसादतः ।
पताकां काञ्चनीं कृत्वा पूजयिष्ये कृपानिधिम् ।। १४ ।।

श्रुत्वा सभ्या अब्रुवंस्ते कामनासिद्धिरस्तु ते ।
हरिं प्रणम्य सभ्यांश्च प्रसादं भुक्तवांस्तदा ।। १५ ।।

जगाम स्वालयं साधुर्मनसा चिन्तयन् हरिम् ।
स्वगृहे ह्यागते तस्मिन्नार्यो मंगलपाणयः ।। १६ ।।

मंगलानि विचित्राणि यथोचितमकारयन् ।
विवेशान्तःपुरे साधुर्महाकौतुकमङ्गलः ।। १७ ।।

ऋतुस्नाता सती लीलावती पर्यचरत्पतिम् ।
गर्भं धृतवती साध्वी समये सुषुवे तु सा ।। १८ ।।

कन्यां कमललोलाक्षीं बान्धवामोदकारिणीम् ।
साधुः परां मुदं लेभे विततार धनं बहु ।। १९ ।।

विप्रानाहूय वेदज्ञान्कारयामास मङ्गलम् ।
लेखयित्वा जन्मपत्रीं नाम चक्रे कलावतीम् ।। २० ।।

कलानिधिकलेवासौ ववृधे सा कलावती ।
अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी ।। २१ ।।

दशवर्षा भवेत्कन्या ततः प्रौढा रजस्वला ।
प्रौढां कालेन तां दृष्ट्वा विवाहार्थमचिन्तयत् ।। २२ ।।

नगरे काञ्चनपुरे वणिक्छंखपतिः श्रुतः ।
कुलीनो रूपसम्पत्तिशीलौदार्यगुणान्वितः ।। २३ ।।

वरयामास तं साधुर्दुहितुः सदृशं वरम् ।
शुभे लग्ने बहुविधैर्मंगलैरग्निसन्निधौ ।। २४ ।।

वेदवादित्रनिनदैर्ददौ कन्यां यथाविधि ।
मणिमुक्ताप्रवालानि वसनं भूषणानि च ।। २५ ।।

महामोदमनाः साधुर्मंगलार्थं ददौ च ह ।
प्रेम्णा निवासयामास गृहे जामातरं ततः ।। २६ ।।

तं मेने पुत्रवत्साधुः स च तं पितृवत्सुधीः ।
अतीते भूयसः काले सत्यनारायणार्चनम् ।। २७ ।।

विस्मृत्य सह जामात्रा वाणिज्याय ययौ पुनः ।
सूत उवाच
अथ साधुः समादाय रत्नानि विविधानि च ।। २८ ।।

नौकाः संस्थाप्य स ययौ देशाद्देशान्तरं प्रति ।
नगरं नर्मदातीरे तत्र वासं चकार सः ।। २९ ।।

कुर्वन्क्रयं विक्रयं च चिरं तस्थौ महामनाः ।
कर्मणा मानसा वाचा न कृतं सत्यसेवनम् ।। ३० ।।

ततः कर्म विपाकेन तापमापाचिराद्वणिक् ।
कस्मिंश्चिद्दिवसे रात्रौ राज्ञो गेहे तमोवृते ।। ३१ ।।

ज्ञात्वा निद्रागतान्सर्वान्हृतं चौरैर्महाधनम् ।
प्रभाते वाचितो राजा सूतमागधवन्दिभिः ।। ३२ ।।

प्रातःकृत्यं नृपः कृत्वा सदः सम्प्राविशच्च सः ।
ततस्तत्र समायातः किंकरो राजवल्लभः ।। ३३ ।।

उवाच स तदा वाक्यं शृणुष्व त्वं धरापते ।
मुक्तामालाश्च बहुधा रत्नानि विविधानि च ।। ३४ ।।
मुमुषुश्चौरा गतास्सर्वे न जानीमो वयं नृप ।
इति विज्ञापितो राजा पुण्यश्लोकशिखामणिः ।। ३५ ।।

उवाच क्रोधताम्राक्षो यूयं संयात मा चिरम् ।
सचौरं द्रव्यमादाय मत्पार्श्वं त्वमुपानय ।। ३६ ।।

नो चेद्घनिष्ये सगणानिति दूतान्समादिशत् ।
नृपवाक्यं समाकर्ण्य प्रजग्मुस्ते च किंकराः ।। ३७ ।।

बहुयत्नैर्न संशोध्य द्रव्यं चौरसमन्वितम् ।
एकीभूत्वा निशि तदा महच्चिन्तातुरोऽभवत् ।। ३८ ।।

हन्ता मां सगणं राजा किं करोमि कुतः सुखम् ।
नृपदण्डाच्च मे मृत्युः प्रेतत्वाय भवेदिह ।। ३९ ।।

नर्मदायां च मरणं शिवलोकप्रदायकम् ।
इत्येवं संमतं कृत्वा नर्मदायास्ततं ययुः ।। ४० ।।

विदेशिनोऽस्य वणिजो ददर्श विपुलं धनम् ।
मुक्ताहारं गले तस्य लुठितं वणिजोऽस्य च ।। ४१ ।।

चौरोऽयमिति निश्चित्य तौ बबन्धात्मरक्षणात् ।
सधनं सह जामात्रा नृपान्तिकमुपानयत् ।। ४२ ।।

प्रतिकूले हरौ तस्मिन्नाज्ञापि न विचारितम् ।
धनागारे धनं नीत्वा बध्नीतौ तौ सुदुर्मती ।। ४३ ।।

कारागारे लोहमयैः शृङ्खलैरङ्गपादयोः ।
इति राजाऽऽज्ञया दूतास्तथा चक्रुर्निबन्धनम् ।। ४४ ।।

जामात्रा सहितः साधुर्विललाप भृशं मुहुः ।
हा पुत्र तात तातेति जामातः क्व धनं गतम् ।। ४५ ।।

क्व स्थिता च सुता भार्या पश्य धातुर्विपर्ययम् ।
निमग्नौ दुःखजलधौ को वां त्रास्यति सङ्कटात् ।। ४६ ।।

मया बहुतरं धातुर्विप्रियं हि पुरा कृतम् ।
तत्कर्मणः प्रभावोऽयं न जाने कस्य वा फलम् ।। ४७ ।।

समं श्वशुरजामात्रौ द्वादशेषु विषादिनौ ।

इति
श्रीभविष्ये महापुराणे
प्रतिसर्गपर्वणि द्वितीयखण्डे
कलियुगीयेतिहाससमुच्चये
अष्टाविंशोषऽध्यायः

अथ
